॥ चिंतामणिरयं॥

॥चिं॰मू॰प्र॰ ॥१॥

श्रीगणेशायनमः॥गुणातीतोपीशस्त्रिगुणसचिवस्त्र्यक्षरमयस्त्रिमूर्तिर्यःसर्गस्थितिविलयकर्माणितनुते।कृपापारावारः
परमगतिरेकस्त्रिजगतांनमस्तस्मैकस्मैचिदमितमहिम्नेपुरभिदे॥१॥अन्वीक्षानयमाकलय्यगुरुभिर्ज्ञात्वागुरूणांमते
चिंतादिग्यविलोचनेनचतयोःसारंविलोक्याखिलं।तंत्रेदोषगुणेनदुर्गमरतेसिद्धांतदीक्षागुरुर्गंगेशस्तनुतेमितेनवच
साश्रीतत्वचिंतामणिं॥२॥यतोमणेःपंडितमंडनक्रियाप्रचंडपाखंडतमस्तिरस्क्रिया॥विपक्षपक्षेनविचारचातुरीनचस्वसिद्धां
तवचोदरिद्रता॥३॥इहखलुसकलशिष्टैकवाक्यतयाभिमतकर्मारंभसमयेतत्समाप्तिकामोमंगलमाचरति।तत्रयद्य
पिमंगलस्यकारणतानान्वयव्यतिरेकगम्याविनापिमंगलेमफल--नाद्यनुष्ठितस्समाप्तेःनाभिजन्मांतरीयकल्पनं।अन्यो
न्याश्रयात्।लोकावगतकारणेनान्यथासिद्धेश्च।नापिमंगलेसफलेअविगीतशिष्टाचारविषयत्वात्दर्शादिवदितिफल
सिद्धौप्रारिप्सितसमाप्तेस्तदानीमपेक्षितत्वेननियमतोपस्थितत्वात्फलांतरस्यातथाभावाद्विश्वजिन्न्यायेनफलकल्पने
गौरवात्।परिशेषानुमानेनकारणताग्रहः।व्यभिचारेणकारणत्वस्याभावादुपायसहस्रेणापिग्रहीतुमशक्यत्वादिति।तथा
पितथाविधाचारानुमिताश्रुतिरेवमंगलस्याभिमतसमाप्तिहेतुत्वेमानं।नव्यभिचारः।निःप्रतिपक्षस्यमंगलस्यसमाप्ति
साधनमितिप्रमापितत्वात्तथापितथैवलिंगेनजन्मांतरीयतदनुमानात्।तत्रेदमारब्धकर्मांगकर्मोचितयाशिष्टैस्तत्पूर्वंक्रियमा
णत्वात्।फलांतराभावेसतिफलवत्कर्मारंभसमानेननियमतस्तत्पूर्वंक्रियमाणत्वाच्च।दर्शप्रयाजवत्।आचारमूलकश्रुत्य
नुमानात्स्यात्दर्शितयातत्कर्तव्यत्वबोधनात्।तत्फलत्वबोधनाच्च।दर्शारंभसमयेनियमेनक्रियमाणयोरप्यारभणीयाया
स्तदर्थितयाक्रियमाणत्वात्।फलाभावश्रवणाच्चप्रधानत्वमितिनतयाव्यभिचारः।ननुमंगलमलौकिकंलौकिकेनांगं।लौ
कावगतकारणतएवनत्सिद्धेः।अतएवमुग्धहस्तादौचारेणाग्नेउद्बाहुर्बृहद्व्यःपायसंब्राह्मणान्भोजयितव्यइत्यत्रतदुभयंनांगं
किंतुनिमित्तकं।तद्वदिदमारंभसमयनिमित्तकमस्तु।विश्वजिन्न्यायात्स्वर्गःफलमितिचेत्न।तस्याःपूर्वरूपोपकारजनक ॥हेरंब॰॥ ॥१॥

गविषयत्वात्॥अयंतुप्रतिबंधकाभावरूपउपकारी।तस्यलोकावगतकारणसहकारित्वेनप्रतिबंधकेरतितस्मात्तदनुत्पत्तेः।अपि
चेत्तुनतथा।विघ्नध्वंसद्वाराचेदमंगं।नतिरोयजतीत्यादिविधिबोधितप्रयाजाद्यंगयागवददृष्टद्वारामंगलजन्यान्यदृष्टंविना
१। पिस्वतःसिद्धविघ्नविरहवतआरब्धनिर्वाहात्।नचैवंदुरितध्वंसद्वारानेदमंगात्तत्रैवव्यभिचारादितिवाच्यं।सतिविघ्नेतद्ध्वं
सद्वारातस्यांगत्वात्।नचैवंप्रयाजादावपिदुरितध्वंसवद्द्वारकल्पनंदुरितध्वंसतोऽपूर्वस्यलघुत्वात्।वस्तुतस्तत्प्रायशो
विघ्नसंशयेतन्निश्चयेवानियमेनशिष्टानांमंगलाचारात्विघ्नध्वंसएवद्वारत्वेनाकांक्षितः।निर्विघ्नपरिसमाप्यतामितिकामनयातक
प्रणपक्षेश्रुतितएवतद्वारत्वनिर्णयः।किंचापूर्वद्वारत्वेलौकिकांगत्वविरोधः।अकृप्रकारणतएवतदुत्पत्तेमपिंद्रबाहुवघनवत्।ननुविघ्न
संदेहेकथंतत्रांगार्थप्रवृत्तिःदुरितध्वंसार्थिप्रवृत्तेरतन्निश्चयस्यहेतुत्वात्।प्रायश्चित्तवदितिचेत्न।विघ्नस्यसंशयेतन्निश्चयेवानि
यमेनशिष्टानांमंगलाचाराद्विघ्नज्ञानंप्रवर्तकं।तादृशाचारानुमितविधिनापिविघ्नज्ञानवानारब्धसमाप्तिकामोधिकारीबोध्यते॥
प्रायश्चित्तेतुतन्निश्चयवानेवविधिबोधनात्।अतएवाधिकारिविशेषणंविघ्नइतिकथंतत्संदेहेप्रवृत्तिः।वैदिकेधिकारनिश्चया
देवप्रवृत्तेरित्यपास्तं।यतःप्रधानाधिकारिणएवांगेऽधिकारोनस्वतंत्रः।अंगत्वभंगप्रसंगात्।नचप्रधानेप्रारिप्सितदुरितमधिकारिवि
शेषणं।विरोधात्।किंतुसमाप्तिकामना।सात्वनिश्चितेपि।फलस्यचनिश्चिताधिकारकत्वेकल्पेपिमंगलेसंदिग्धाधिकारिकत्वेकमेव।
विघ्नसंदेहवतांशिष्टानांआचारानुमितवेदेनतथैवबोधनादिति।तन्नविघ्नवत्वेनाधिकाराभावात्।क्वचित्तन्निश्चयेपिप्रवृत्तेश्च।अपि
चाशंकितारिष्टवारणार्थमपिप्रवर्तंतेपरीक्षकाः।यथासर्पादिदंशजन्यविषसंशयेतन्नाशायभेषजपानादौ।किंचफलस्यसंशये
पिउपायत्वनिश्चयात्।यथाकृष्यादौप्रवृत्तिस्तथामंगलेपि।यदिविघ्नसंसतिकृष्यादितोवश्यंफलमितितत्कोतत्रप्रवृत्तिः।तथासति
विघ्नेमंगलादवश्यंफलमितितत्कोदत्रापिप्रवृत्तिः।ननुस्पष्टस्पर्शनाश्लेषनिमित्तेज्यायामिष्टिवन्नदन्तोधर्मग्रहेसत्यविदेशागत
स्वेदिनकर्तव्यदेवतावाहनस्यांगस्यस्पर्शाश्लेषद्वाराशायेऽननुष्ठानमुक्तमपथ्याकल्पहूरबाधे।अतोविघ्नसंशयानध्वंसद्वा

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

रसंशये कथं मंगलानुष्ठानमिति चेत् न। नैमित्तिके हि निमित्तनिश्चयवानधिकारी यथाभिन्ने जुहोतीत्यत्र पात्रभेदनवान्। तथेहाश्लेषवानधि
कारीति पूर्वेद्युर्दिने आश्लेषनिश्चयाभावाद्युक्तमननुष्ठानं। अपि च इज्याकर्तव्यतानिश्चये तदंगानुष्ठानं न चाश्लेषसंशये तन्निश्चयः पूर्वे
दिनेऽतः प्रधानेऽधिकाराभावान्नांगेऽधिकार इति नावाहनं पूर्वेदिने। यदि च यद्दिनस्यादिति न्यायेन कुर्यात्तदाऽनधिकृतकर्तृत्वेनानिः
लं स्यात्॥ स्वस्याश्लेषसत्तीज्याकर्तव्यतानिश्चयेऽपि नावाहनं पूर्वेदिने स्यांगस्याभावात् इतीज्यायामावाहनबाध एव॥ मंगले तु विघ्नज्ञानं
वानधिकारी तु तं॥ तत्त्वसंशयेऽप्यस्ति। प्रधाने कर्तव्यतानिश्चयोऽस्त्येव विघ्नसंदेहेऽपि युक्तमनुष्ठानं॥ भविष्यद्विवाहाभ्युदयिके पितनन्दी
नवानधिकारी तथैवाचारात्॥ नन्वंगानां प्रधानविधिविधेयत्वेन च ग्रंथादिसमाप्तेरप्रधानविधिरस्ति॥ न च तत्कर्तव्यताबोधकस्य लौ
किकप्रमाणस्य शास्त्रमेकदेशोऽयुज्यते। तस्य तन्निरपेक्षत्वादिति चेत् न। अपूर्वजनकांगानां तथात्वात्। आचारानुमितश्रुत्या प्रधा
नविधिं विनापि तदंगत्वबोधनाच्च। अपि च प्रधानकर्तव्यताबोधकबोध्यकर्तव्यताकत्वं प्रयोजकं। न च तदिहाप्यस्ति। प्रतिबंधकाभावस्य स
कलकार्यहेतुत्वेन लौकिकप्रमाणस्यापि तत्सापेक्षत्वात्॥ यागादिवत्प्रधानदेशकालान्वयस्तदंगे मंगलेऽपि स्यादिति चेत् न। असाधारणे
पूर्वजनके अंगे तदन्वयात्। अत एव न बहुशाखत्वादिप्रधानदेशकालान्वयः। न च दुरिताभावस्वतः सिद्धः सांगमंगलानुष्ठानं नि
फलमिति तद्बाधकवेदाप्रामाण्यं॥ लोकावगतकारणे हि सति दुरिते वेदेन तस्य ध्वंसजनकत्वं बोध्यते। न तु तदुल्लंघ्य। अत एव तत्त्वज्ञानव
तो भोगार्थं निषिद्धानुष्ठाने दोषाभावात् धर्मजनकमिति न तद्वेदाप्रामाण्यं। प्रमाणांतरात्स्वतःसिद्धदुरिताभावावगतौ मंगलाद्
एनिस्यवदनुष्ठानं शिष्टानामयुज्यतेति चेत् न। विघ्नज्ञानवतो भैषज्यवदनुष्ठानादिति संप्रदायः। मैवं॥ मंगलं विनापि प्रमत्तानुष्ठितसमा
प्तेः। न च तेन विनापि सिध्यतस्तदंगं। न च जन्मांतरीयं तत् जन्मांतरीयग्रंथादिकमुद्दिश्य शिष्टैस्तदकरणात्॥ ननु यथा पुत्रेष्टे
कर्मसाद्गुण्ये ऐहिकफलाभावे आमुष्मिकफलं तथा सांगेऽपि मंगले यत्र न फलं तत्रामुष्मिकं फलमिति चेत् न। पुत्रमात्रस्य तत्काम
नाश्रवणात्॥ इह तु प्रारिप्सितपरिसमाप्तिकामनया मंगलश्रवणमिति तथैव वेदानुमानात्। कारीरीवदासन्नसमयारब्ध
समाप्तिः फलं॥ न चासन्नसमयस्तत्संबंधो वा मंगलजन्येप्सितसमाप्तिमात्रजन्यो न चामुष्मिकसाधारणमिति चेन्न। आसन्ने
समयस्य स्वर्गसमाप्त्युपलक्षकत्वात्। अन्यथा कारीर्यपि नासन्नसमयफलं स्यात्। तस्माद्वृष्टिं विना न तदंगमिति। अन्ये तु

मंगलं प्रधानं अदृष्टद्वारा आरब्धकर्मसमाप्तिः फलं॥ तत्कामोऽधिकारी। क्वचित्तदभावः कर्मादिवैगुण्यात्। कारीरीवत्। न चान्यदापि तत्कारणं॥
नियतकालीनता दृशाचारेण फलवत्कर्मारिप्समानः तत्समाप्तिकामो मंगलमाचरेदिति श्रुत्यारंभसमये कर्तव्यताबोधनात्। यथाग्ना
वैष्णवमेकादशकपालं निर्वपेद्दर्शपौर्णमासावारप्स्यमान इति श्रुत्या आरंभणीयेष्टेः प्रधानायाद्यारंभसमयकर्तव्यता। कामनापू
ऽधिकार्यत्वे प्रारंभकाले नियतमनुष्ठानं प्रारब्धसमाप्त्यर्थिनोपायत्वेन तदनुष्ठानात्। न च काम्यत्वे परिसमाप्तिकामनां विना फलवत्कर्मा
रंभोऽपि तदनुष्ठानं न स्यादिति वाच्यं॥ समाप्तं कर्मफलाय फलमिति फलार्थिनः समाप्तेः कामनावश्यंभावादिति तन्न। कारीरीजन्यातिशा
यवद्विहितप्रधानजन्यातिशयवन्मंगलजन्यापूर्वस्यापि फलसंपादकादृष्टकारणसंपादकतयारब्धकर्मसमाप्तिफलावश्यंभावापत्तेः।
फलावश्यंभावनिश्चयं विना वैदिककर्माननुष्ठानात्। न चैवमपि सांगेऽपि मंगले क्वचिदारब्धसमाप्त्यभावात्। न च तत्रामुष्मिकं फलं॥
ऐहिकमात्रफलकत्वात्। वैदिककर्मणः फलावश्यंभावे वांगतुकदुरितप्रतिबंधस्याप्यभावात्। किंच यथा कारीर्यादिकमग्रिमपुरु
षव्यापारं विनाफलहेतुस्तथा मंगलमपि तेन विनैव फलहेतुः स्यात्॥ न चैवं लोकावगतकारणत्वानपेक्षेति चेत्। स एव तर्हि हेतुरस्तु।
किमनेन आरब्धकर्मजनकदृष्टकारणसंपत्तौ पुत्रेष्टिवत्समाप्तिकारणत्वेऽस्याबाध्यत इति चेत् न। तत्र दृष्टसंपत्तौ पुत्रानुत्पाद
दृष्टद्वारा पुत्रेष्टिजन्यत्वकल्पनं। न च कर्मनिर्वाहदृष्टसकलफलहेतुसंपत्तौ विलंबाय न मंगलजन्यादृष्टापेक्षा स्यात्। अपि च
मंगलं विनापि प्रमत्तनास्तिकानुष्ठितसमाप्तिर्न तत्कारणं। जन्मांतरीयपुण्यसंपत्तिस्तत्र हेतुरिति वक्तव्यं न। तथापि व्यभिचारात्। बुद्धि
पुण्यसंपत्तिः क्वचिन्मंगले हेतुरिति व्रीहियववद्विकल्प एवेति चेत् न। तर्हि तत्संपत्तावनयानियतमनुष्ठानं न स्यात्। यवप्रयोगवद्व्रीहिविकल्पे
नाभयस्याशास्त्रार्थत्वात्। ननु विघ्नाधिक्यं न फलनियतपूर्वसत्त्वं बाधयतीति कुतो मंगलान्मंगलावश्यंभाव इति चेत् न दृष्टसाधनत्वस्य
विकल्पत्वात्। अन्वयव्यतिरेकाभ्यां तद्ग्रहे व्यभिचारो दोषाय न तु आगमेन तद्ग्रहे। तदुक्तं। आगममूलत्वाच्चास्यार्थस्य व्यभिचारो
न दोषायेति। अत एव यागादेः स्वर्गसाधनत्वेऽपि न नियतपूर्वसत्त्वस्य ग्राह्यस्याभावादागमेनापि बोधयितुमशक्यत्वात्। याग
च जनितस्वर्गकारीरीजनितवृष्ट्योर्जातिविशेष एवास्ति। अपरे तु मंगलस्यारब्धनिर्वाहकत्वे विघ्नसंसर्गाभाववद्द्वारा। तथैव प्रतिबंधका
भावस्य हेतुत्वात्॥ सत्याभावः सतो विघ्नस्य ध्वंसोऽनागतस्यानुत्पादश्चारब्धकर्मनिर्वाहसमयस्थायी विघ्नकारणं विनाशनद्वारा प्रागभा

वस्यसाध्यत्वं। यस्मिन्सत्यग्रिमक्षणे यस्यसत्त्वंतद्व्यतिरेके चासत्त्वंतदेवतज्जन्यत्वं। नचासतःसत्त्वंगौरवात्। अस्तिचविघ्नकारणनाशेऽसतिविघ्नप्राग
भावस्यतथात्वं। तावतिसमयेदुरितानुत्पादकत्वेनसाक्षान्मंगलजन्यत्वस्यदृष्टद्वारातथा॥ पूर्वंनिर्विघ्नंसमाप्यतामितिकामनयाऽचारोपिसंगच्छते॥
अतएवयत्रविघ्नाभावःस्वतस्सिद्धस्तत्रसांगमंगलस्याकिंचित्करत्वेनवेदाप्रामाण्यमितिनिरस्तं। अनागतविघ्नानुत्पादस्यतत्रापिसाध्य
त्वात्। सर्वेविघ्नाःशमंयांतियत्रविनायकस्तवपाठादौश्रुतमस्तितत्रततएवप्रमत्तानुष्ठितसमाप्तेः। अनादौसंसारेयत्रयत्रतदावरणात्॥ तथा
चतेनसमंमंगलस्याविकल्पमेव। यत्रसांगेपिमंगलेसत्यपिनफलंतत्रविघ्नसत्यस्त्वादिति। तन्न। विघ्नानुत्पादस्यव्यापारत्वेमानाभावात्।
संसर्गाभावत्वेनहेतुतातथैवव्यापारत्वंतच्चप्रागभावेप्यस्तीतिचेन्न। अत्यंताभावस्यापिव्यापारत्वापत्तेः। स्वतःसिद्धस्यतस्यहेतुत्वेयदि
तदाप्रागभावस्यापितुल्यं। किंचयत्रमंगलंनतत्रनियमेनविघ्नकारणमस्ति। येनतन्नाशद्वाराप्रागभावस्यापिसाध्यत्वं। एवमपियत्र
विघ्नानुत्पादोपिस्वतःसिद्धस्तत्रमंगलमकिंचित्करमेव। विघ्नध्वंसानुत्पादयोरारब्धनिर्वाहकालाविलम्बादिनोमंगलादेवतदुत्पत्तेर्नतदर्थ
मदृष्टद्वारता। मंगलस्याविकल्पेनान्वयेशिष्टैर्नियमतोमंगलानुष्ठानंनस्यादित्युक्तं॥ किंचप्रयत्नत्वेनसांगमंगलमात्रेणसमाप्तिहेतुः
तस्मिन्सत्यपितदभावात्। प्रचितेनतथात्वेतुन। अप्रचितादपिफलसत्त्वात्। नोभयंअननुगमात्। गुरुकर्मारंभेप्रचितमल्पकर्मारंभे
अल्पमितिचेन्न। प्रचितादृशादपिफलसत्त्वात्। वैपरीत्येपिफलसत्त्वात्। च। एतेनबहुविघ्नशंकयाबहुतरमल्पविघ्नशंकयामल्पंच
हेतुः। तादृशाचारेणतादृशश्रुत्यनुमानादितिनिरस्तं॥ तादृशादपिपरिमितासमाप्तेःवैपरीत्येपिसमाप्तेश्च। बहुत्वस्यत्रित्वचतुरादिभा
वेनाल्पत्वस्यचैकद्व्यादिरूपतयाननुगमेनश्रुत्याबाधयितुमशक्यत्वात्तस्मान्मंगलंनांगंनवाप्रधानमितिपरेषांपक्षः॥ ७॥ ॥
शंका। तन्न। आरब्धसमाप्तौमंगलंनांगंनवाप्रधानमहेतुत्वात्। किंतुप्रायश्चित्तवत्प्रधानंविघ्नध्वंसःफलं॥ आरब्धनिर्वाहेविघ्नोमा
भूदितिकामनयातदनुष्ठानात्॥ विघ्नसंशयेनिश्चयेवाशिष्टानांतदाचारात्॥ विघ्नाभावस्याकांक्षितत्वाच्च॥ यद्वानिर्विघ्नंस
माप्यतामितिकामनात्तदापिनागृहीतविशेषणन्यायेनाहंस्वर्गीस्यामित्यत्रस्वर्गवद्विघ्नाभावएवफलं॥ नतुसमाप्तिः॥ उभय
तोव्यभिचारात्। समाप्तिस्तुविघ्नरूपप्रतिबंधकाभावेसतिलोकावगतकारणादेव। प्रचिताप्रचितभेदश्चनास्त्यस्याति
सांगमंगलासेकविघ्नध्वंसोपत्वेव॥ अतोवैदिकफलनिश्चयान्मंगलेप्रवृत्तिः। ननुवेदाप्रामाण्यंसमाप्त्यभावश्चभूरि

प्राचीनविघ्नसत्त्वात्क्वचिन्मंगलानंतरोत्पन्नविघ्नात्। क्वचिल्लोकावगतकारणाभावात्॥ प्रारिप्सितविघ्नध्वंसश्चनमंगलंविना
नचप्रायश्चित्तेनशंकितविघ्ननाशः। विघ्नसंशयेतदनुपदेशात्। नचकामनोपाधिकर्तव्यत्वेनियतमनुष्ठानंनस्यादितिवाच्यं॥ आ
रब्धकर्मकारणप्रतिबंधकाभावोपायत्वेनावश्यंतदनुष्ठानात्॥ तेनविनाप्रतिबंधकाभावेसतिकर्मानुत्पत्तेः। नचप्रधानत्वेऽन्य
दापितत्करणंनियतसमयशिष्टाचारानुमितश्रुत्याकर्मारंभसमयेतत्कर्तव्यत्वबोधनात्॥ दर्शारंभसमयेआरंभणीयावत्॥
विघ्नसंसर्गाभावश्चसमाप्तिहेतुःसचक्वचित्स्वतःक्वचिन्मंगलसाध्यः। अतएवमंगलंविनापिजन्मांतरानुवर्तमानाद्विघ्नात्यंता
भावात्प्रमत्तानास्तिकानुष्ठितसमाप्तिः। नचानवसायशंकितविघ्नवारणार्थंप्रवृत्तिः। अतोयावद्विघ्नाशंकंतदनुष्ठानात्॥
अतएवतद्वकयामध्येपितदाचरंति। गुर्वारंभेचबहुविघ्नशंकयाबहुमंगलाचरणं॥ यथाचविघ्नसंशयेपिप्रवृत्तिस्तथोक्तं॥
मं स्यादेतत्॥ मंगलमाचरेदितिविधौकिंमंगलत्वं। नदेवतास्तुत्यादित्वंअननुगमात्। नापिप्रारिप्सितप्रतिबंधकविघ्नोपशमहे
तुक्रियात्वं। विघ्नोत्सारणासाधारणकारणत्वंवा॥ क्रियाविशेषतदसाधारणकारणस्यवास्तुत्यादेर्वेदाद्विशिष्यापरिचयप्रव
त्तिविषयत्वाभावात्॥ नापिनिर्विघ्नंसमाप्यतामितिकामनयाशिष्टाचारविषयत्वं। वेदस्याचारस्यानुपजीवकत्वात्। वेदाद
द्याचारानुपपत्तेश्च। अन्योन्याश्रयात्। नापितत्कामनयावेदविहितत्वं। प्रारिप्सितकर्मनिर्वाहकत्वेसतिकर्मांतरारंभका
लेविहितत्वंवैदिककर्मत्वंवा॥ नादृशावेदांतराभावात्। नापिस्मृत्यादौमंगलत्वेनोत्कीर्तितत्वं॥ वेदस्यस्मृत्यनुपजीवक
त्वात्। स्मृतिकर्तुरेववेदाद्याचारानुपपत्तेश्च॥ ॥उच्यते॥ मंगलमाचरेदितिनविधिः। किंतुनिर्विघ्नसमाप्तिकामोदेव
तास्तुतिमाचरेदित्यादिप्रत्येकमेवविधिः। तथैवशिष्टाचारात्तदुपजीव्यनिर्विघ्नंसमाप्यतामितिकामनयातद्विघ्नो
पशमहेतुत्वेनवावेदविहितत्वंमंगलमित्यवगत्यदेवतास्तुत्यादिषुमंगलव्यवहारःशिष्टानां॥ अतएवदुरितनाशक
मपिगंगास्नानादिनमंगलं॥ तथा -- नात्॥ मंगलाचारयुक्तानांनित्यंचप्रयतात्मनां॥ जपतांजुह्वतांचैवविनिपातो
नविद्यते॥ इत्यनेनबोधितादृष्टदर्शनादेःपृथगेवमंगलत्वं॥ नचविघ्ननिवर्तकतयातत्रतेनार्थतेव। अन्यथा

॥वि०मू०प्र०॥
॥१॥

ग्रंथारंभे नमस्कारमतुल्यतया तत्करणप्रसंगः। अथशब्दोविघ्ननिवर्तकत्वान्मंगलमेव। ॐकारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः
पुरा। कंठं भित्वा विनिर्यातौ तेन मांगलिकावुभौ। इति स्मृतेः। न तु नमस्कृतमेव तस्य॥ शास्त्रारंभे महर्षिणा तदनुपादानप्र
संगात्। गुणवत्तयाज्ञापनं स्तुतिः। युष्मदिद्वययस्य स्वापकर्षबोधनानुकूलो व्यापारविशेषः स च तस्य नमस्कारः। व्यापारे
च कायिकवाचिकमानसिकरूपविशेषो जातिविशेष एवानुभवसाक्षिकः। करशिरःसंयोगमात्रे तद्व्यवहारात्॥
भवतोहमपकृष्ट इत्यादिवचने तद्व्यवहाराच्च॥ यद्वा कायिकादौ प्रत्येकमेवविधिकल्पनमतो नानार्थतैव॥ यत्तु बुद्धिवि
शेषपूर्वकत्वज्ञाने विना कायिकादौ न तद्व्यवहार इति स एव शक्यो ऽन्यत्र लक्षणेति तन्न कायिकादिव्यापारविशेषमवगम्य
तद्ज्ञानात्॥ स्वीकृतवेदप्रामाण्यः शिष्टः। आचारे च वेदानिषिद्धत्वरूपमविगीतमलौकिकत्वं चाविशेषणं देयं॥ यद्वा अलौकि
कविषयशिष्टाचारत्वमेव हेतुः। शिष्टाचारत्वं चेत्प्रमजन्याचारत्वे आस्तिकनास्तिकपारगम्यागमने चैत्यवंदनाचारजनकज्ञा
नस्य भ्रमत्वात्। बलवदनिष्टाननुबंधित्वादिसाधनत्वाच्च॥ लोके च पाखंडव्यावृत्तशिष्टव्यवहारो वेदप्रामाण्याभ्युपगमनिबं
नः धनो लैंगिकत्वेपि शिष्टाशिष्टव्यवहारो वेदनिषिद्धाकर्तृत्वकर्तृत्वनिबंधनः। यद्वा वेदप्रामाण्याभ्युपगंतृत्वे सति यो यदा वेदनिषि
द्धाकर्ता स तदा शिष्टः। अत एव वेदानिषिद्धकर्तृत्वेपि बौद्धो न शिष्टः। पापजनकज्ञानं विना वेदनिषिद्धकर्तृत्वं यस्य नास्ति
स शिष्ट इति तु न। लैंगिकस्यापि कस्यचित्पापजनकज्ञानं विना वेदनिषिद्धकर्तृत्वात्॥ यत्तु रागद्वेषहीनः शिष्टः॥ स च सर्वज्ञत्वा
न्मन्वादिरेव। अविगीतवेदाचारादेव वेदानुमानमिति तन्न। एवं हि मन्वाद्याचारादर्शिनामाधुनिकानां मंगले प्रवृत्तिर्न स्यात्।
आधुनिकानामाचारेणानुमितमन्वाद्याचाराद्वेदमनुमाय बालः प्रवर्तत इति चेत्तर्हि यादृशाचारेण मन्वाद्याचारानु
मानं स एव वेदानुमापकोस्तु किमनुमितानुमानेन। आधुनिकानामपि शिष्टत्वव्यवहाराच्च॥ तथा च स्मृतिः। यस्मिन्देशे य
आचारः पारंपर्यक्रमागतः। श्रुतिस्मृत्यविरोधेन स सदाचार उच्यते॥ सर्वज्ञस्य मंगलाचारे मानाभावाच्च॥ मन्वादिप्रणीतस्मृ
तौ मंगलं दृश्यत इति चेन्न। स्मृतिकर्तुरसर्वज्ञत्वेपि वेदादर्थं प्रतीत्य स्मृतिप्रणयनसंभवात्॥ यत्तु शिष्टाचारत्वेन कर्तव्यतैवा

[illegible]

॥हेरंब॥
॥४॥

अथ जगदेव दुःखपंकनिमग्नमुद्दिधीर्षुरष्टादशविद्यास्थानेष्वभ्यर्हिततमामान्वीक्षिकीं परमकारुणिको मुनिः प्रणिनाय। तत्र प्रेक्षावत्
प्रवृत्त्यर्थं प्रमाणादिषोडशपदार्थतत्त्वज्ञानान्निःश्रेयसाधिगम इत्यादावसूत्रयत्। तेषु च प्रमाणाधीना सर्वेषां व्यवस्थितिरिति प्रमा
णतत्त्वमत्र विविच्यते। ननु प्रमाणादीनां तत्त्वप्रतिपादकशास्त्रं परंपरया निःश्रेयसेन संबध्यत इति न युक्तं। प्रमाणतत्त्वाधा व
रणस्याशक्यत्वात्। तद्धि प्रमातत्त्वावधारणाधीनं तच्च स्वतः परतो वा न संभवति वक्ष्यमाणदूषणगणग्रासात्। अर्थाद्विप्रामाण्य
ज्ञानेन प्रवृत्तिमात्रे तस्य व्यभिचारात्॥ बहुवित्तव्ययायाससाध्यप्रवृत्तिश्चावश्यकार्थनिश्चयादेव। न च स्वरूपसंशयव्यतिरे
कनिश्चयौ प्रवृत्तिप्रतिबंधकौ तन्निश्चयः प्रवृत्तिहेतुरनुमितौ व्याप्तेरिवेति वाच्यं। तत्संदेहे संशयसंदेहेनार्थानिश्चयादेवाप्रव
त्तेः। तत्र तयोरप्रतिबंधकत्वादिति चेत्। न प्रामाण्यसंशयानंतरमिदमित्थमेवेत्यवधारणस्य निष्कम्पप्रवृत्तेः सत्यस्य प्रामाण्यनि
श्चयाधीनत्वात्। ननु स्वत एवास्तु तन्निरूपणं। तथाहि विप्रतिपत्तयः। ज्ञानप्रामाण्यं तदप्रामाण्याग्राहकयावज्ज्ञानग्राहकसा
मग्रीग्राह्यं न वा। ज्ञानं विपयरत्ताना जन्यज्ञानग्राह्यं न वा। प[illegible]तः क्षिप्तज्ञानं तदेव ज्ञानेन तत्प्रामाण्यग्रहः। स्वतस्त्वं प्रामाण्यवत्त र
ज्ज्ञानस्य ग्रहात्। स्वाश्रयग्राहकेण गृह्यत एव न वा। स्वाश्रयग्राहकेण गृह्यतेव न वेति प्रत्येकमेव वा। यत्तु योगजधर्मलक्षणसामान्यलक्ष
णप्रत्यासत्त्यजन्यस्वप्रामाण्यं तेनैव गृह्यत इत्यस्मात्। सिद्धसाधनमतो योगजधर्मो जन्यत्वविशेषणं। तन्न। परं प्रत्यसिद्धेः प्रामाण्य
मात्रपक्षत्वे प्रामाण्यं स्वाश्रयेण गृह्यत एवं संदेहप्रतीतेरसिद्धेश्च नाश्रयतः सिद्धसाधनं। यद्वा घटोयमिति ज्ञाने न प्रामा
ण्यमेतज्ज्ञानग्राह्यं न वेति एतज्ज्ञानग्राह्यमात्रग्राह्यं न वेति। तत्र येषु दिविशेष्यः वस्य प्रकारकत्वमगृहीतग्राहित्वं वा। पूर्वे यथा म्र्य

॥चिं॰ मू॰ प्र॰
॥५॥

र्थत्वपक्षे अनुभवत्वजातेरसिद्धत्वेन स्मरणान्यज्ञानत्वे विशिष्टज्ञानत्वे वा प्रामाण्ये स्वस्य न तेनैव। नवानुव्यवसायेन ग्रहणयोग्य
विशेष्यावृत्यप्रकारकत्वादिविशेषणस्य प्रागनुपस्थितौ तद्विशिष्टस्य स्वस्य ज्ञातुमशक्यत्वात्। नापि ज्ञानातीन्द्रियत्वे ज्ञानानुमि
त्यात्तद्गृह्यते ज्ञानमात्रलिङ्गस्य प्राकघादः तद्व्याप्तिनाशात्। नापि प्रमा हि तज्ज्ञानताविशेषात्। तस्य प्रथममनिरूप्यत्वात्।
अन्यथा अप्रमा हि तज्ज्ञानतया अप्रामाण्यस्यापि स्वतो ग्रहापत्तेरिति। तथापि तद्वति तत्प्रकारकज्ञानत्वं तद्वति तद्विशिष्ट
ज्ञानत्वं वा प्रामाण्यं। तन्निश्चयादेव निष्कम्पव्यवहारात् लाघवाज्ज्ञानत्ववत्। गौरवात्। तच्च ज्ञानग्राहकसामग्रीग्राह्यमेव। तथा हि वि
शेष्ये तद्धर्मवत्त्वं तद्धर्मप्रकारकत्वञ्च व्यवसायस्यानुव्यवसायेनानुमित्या स्वप्रकाशेन वा गृह्यते। विषयनिरूप्यं हि ज्ञानमतो
ज्ञानवित्तिवेद्यो विषय इति व्यवसाये भासमाने धर्मे धर्मिवत्तद्वैशिष्ट्यमपि विषयः। व्यवसायरूपप्रत्यासत्तेस्तुल्यत्वात्। ॥हेरंब॥
स संबंधितावच्छेदकत्वेनोपवृत्तयप्तायमाने सम्बन्धिकसम्बन्धिनि निरूपणमिदमनुव्यवसायस्य रजतत्वावच्छिन्नेन पुरोवर्तिविष ने
यत्वाच्च। अन्यथा पुरोवर्तिनि रजतं च जानामीति तद्बोधः स्यात्। न तु रजतत्वेन पुरोवर्तिनमिति। अत एव अप्रमापि प्रमेत्य
वगम्यते। अनुव्यवसायस्य स्वसमविषयधर्मधर्मिवैशिष्ट्यविषयत्वात्। न च प्रामाण्यं प्रथमतो न ज्ञानमतो न तद्द्वाराप्र
तिवाच्यं। प्रामाण्यस्य ज्ञानग्राहकसामग्रीग्राह्यत्वेन ज्ञानधीवित्तिवेद्यत्वात्। अभावप्रतीतौ प्रतियोगित्वाभाववत्त्वयोरिव
तदभाववति तत्प्रकारकज्ञानत्वेनाप्रामाण्यपरतो ज्ञायते। तदभाववत्त्वस्य [illegible] स्वतस्त्वेनानुव्यवसायाविषयत्वा ॥५॥
त्। न चैवमनुव्यवसायस्य यावद्व्यवसायविषयविषयकत्वे स्यात्तथा नियमोतिप्रसङ्ग इति वाच्यं। बाधानवतारदशायां त

स्येष्टत्वात्। एतदवतारे तस्यैव प्रतिबन्धकत्वात्। उपनायकभूतेरभावाच्च। अत एवास्य भ्रान्तित्वस्य न ग्रहः। अथ तद्वत्त्वेन
धर्मधर्मिवैशिष्ट्यमात्रं। किन्तु तस्य विशेषणताविशेषः स च व्यवसाये भासते नानुव्यवसाये मनसो बहिरस्वातन्त्र्यादिति
चेत्। न व्यवसायोपनीतत्वेन विशेषणविशेष्ययोरिव विशेषणताविशेषस्यापि तद्विषयत्वात्। विशेषणतायाश्च निरा
करिष्यमाणत्वात्। किं च। एतेनास्वप्रकाशज्ञानस्य स्वतः प्रामाण्यग्रहः। धर्मिग्रहे धर्मो गृहीत्वा शब्दगत्ववद्योग्यत्वात् तद्ग्रहेपि
ज्ञानं प्रमाणमिति धीर्न स्यात्। स्वप्रकाशे स्वमात्रसाक्षिणः स्वधर्मग्रहे प्रामाण्ये तत्सामर्थ्यात्सामर्थ्ये वा अप्रामा
ण्यमपि स्वतो गृह्येत वा परप्रकाशे लिङ्गेन मनसा वा जायमाने ज्ञाने नोक्तमव्यावृत्ते प्रामाण्यं गृह्णीयात्। व्यभि
चारात्। न च यत्र पक्षे लिङ्गेन तद्गृह्यते। अप्रामाण्यस्यापि स्वतो ग्रहापत्तेः। अनुव्यवसायस्यानुमितेर्वा विषयजन्यत्वा
च्चेति निरस्तं। तद्वति तत्प्रकारकज्ञानत्वं तद्वति तद्विशिष्टविषयकत्वं च प्रामाण्यं व्यवसायस्येति स्वेनानुव्यवसाय
नानुमित्या वा तद्ग्रहात्। तद्विशिष्टत्वस्य तत्प्रकारकत्वस्य ज्ञानग्राहकसामग्रीग्राह्यत्वात्। यैर्हि प्रामाण्यं परतो ज्ञाय
ते। तदप्रामाण्यज्ञानेपि तदनुमापकलिङ्गपक्षव्याप्त्यादिज्ञानेषु निश्चयार्थं प्रामाण्यस्य परतो ज्ञाप्यत्वे फलमु
खीकरणमुखीभ्यामनवस्थाभ्यामिति प्रामाण्यं न ज्ञायतेति परिशेषादपि स्वतः प्रामाण्यग्रह इति स्वपक्षः॥
सिद्धान्तस्तु। प्रामाण्यस्य स्वतो ग्रहे अनभ्यासदशोत्पन्नज्ञाने तत्संशयो न स्यात्। ज्ञानग्रहे प्रामाण्यनिश्चयात्॥
उत्तरनिश्चये वा। न स्वतः प्रामाण्यग्रहे ज्ञानाग्रहे धर्मिज्ञानाभावान्न संशयः। न तु कोटिस्मरणादिना संशयदर्श

॥चिं॰म॰॥
॥६॥

सकोव्यवसायविना ज्ञानतद्विशेष्यकमानसः संशयइतिचेत् । न ज्ञानोपनीतव्यवसायेप्रामाण्यसंशयात् । ननुधर्मि
ज्ञानेनसंशयहेतुः । कोटिज्ञानविशेषादर्शनधर्मीन्द्रियसन्निकर्षात्प्रामाण्यसंशयरूपएवज्ञानग्रहउत्पद्यतइतिचे
त् न । ज्ञानातीन्द्रियत्वेतद्ग्रहंविनातद्धर्मिकमानससंशयानुत्पत्तेः । लिंगंचनसंशयजनकंतस्यनिश्चायकत्वात् । ज्ञान
स्यमानसत्वेचप्रामाण्यज्ञानंचतत्सामग्र्यपिसंशयप्रतिबंधिका । अन्यथाविशेषदर्शनकालेसंशयापत्तेः । अथधर्मिणि
विशेषादर्शनदशायामेवकोटिस्मरणंतदारोपः कोटिद्वयस्मरणेसंशयइतिनिश्चयसामग्रीतःसंशयसामग्रीब
लवतीतिकोटिद्वयस्मरणेसंशयस्यात् । नतुनिश्चयइतिचेत् न । किंतूभयारोपसामग्रीद्वयसमाजउभयत्रा
रोपएव एवंभवतिसएवसंशयः । नत्वेकारोपसामग्र्याअपरारोपसामग्रीप्रतिबंधः अविरोधात् । नचोभयारोपसाम
ग्र्याएकनिश्चयसामग्रीप्रतिबंधइतिवाच्यं प्रत्येकमारोपसामग्रीद्वयभिन्नायास्तस्याअभावात् नत्वसामग्रीद्वया
कार्यद्वयासमूहालंबनवत्उपपत्तेः तस्मात्प्रामाण्यनिश्चयसामग्रीसत्वान्नतत्रसंशयःस्यात् । धर्मिज्ञानंचसंश
यहेतुः अन्यथासंशयेधर्मिनियमःकोट्युत्कटत्वंचनस्यात् । अथपीतःशंखआदर्शेमुखमित्यादिभ्रमाविशे
षदर्शनेपियथादोषांतरात्तथानिश्चितप्रामाण्येपिदोषांतरात्संशयइतिचेत् न । तद्देवात्रापिप्रवृत्तिप्रसंगात् ।
सासासा । लालारिपत्रमेचसासालालारिविशेषदर्शनेविरोधिदिङ्मोहादौतथादर्शनात्तन्न । पित्तादिनापीत
बधादा । नचपीत्येवकश्चिद्दोषोस्ति । नचप्रामाण्यसंशयाद्विषयसंशयवत् । प्रामाण्यज्ञानेप्रामाण्यसंशयात्

॥हेरंब॥
॥६॥

प्रामाण्यसंशयइतिवाच्यं । प्रामाण्यज्ञानेपिस्वतःप्रामाण्यग्रहेतत्संशयानुपपत्तेः । ननुज्ञानमात्रंनविरोधिबुद्धिनिव
र्तकं । त्विमोत्तरबाधकज्ञानोदयात् । किंत्वनन्यथासिद्धं । अतएवैतेनविनातद्बुद्धिःसंभवतीतिअन्यथासिद्धतया
शंकितंनिश्चयंपरिभूयज्ञानंविषयतयाविषयेयथासंशयः । तथाप्रामाण्येतन्निश्चयस्यान्यथासिद्धिशंकयात
त्परिभूयसंशयः । नचव्यवसायस्यज्ञानत्वेघटविषयत्वेचयथानुव्यवसायविषयत्वान्नसंशयःतथाप्रामाण्येपि
नस्यादनुव्यवसायस्यप्रमात्वनियमादितिवाच्यं अज्ञाने विषयत्वज्ञानत्वविषयत्वयोःअनुव्यवसायेनाग्रहण
नियमात्तद्विषयत्वमनन्यथासिद्धं । प्रामाण्यविषयत्वंचैतेनविनापिसंभवतीतितत्रसंशयइतिचेत् । मैवंधर्म
त्वमन्यथासिद्धत्वं ततश्चप्रामाण्यसंशयेनतद्विषयेप्रामाण्यसंशयइतिफलितार्थः भ्रमत्वसंशयश्चतद्बाधकाबो
धात्सानसंभवतीत्युक्तत्वात् । एवंनिश्चयेभ्रमत्व[illegible] अन्यत्रापिभ्रमत्वसंशयान्नविषयसंशयः । स्वतःप्रा
माण्यग्रहेभ्रमत्वसंशयाभावात् । नचैवंप्रामाण्यसंशयान्नविषयसंशयोमानाभावात् । ज्ञानविषयत्वा
देवसमानधर्मात्तदुपपत्तेः । नन्वेवंसर्वत्रविषयसंशयेतन्निश्चयोच्छेदः । प्रामाण्यसंशयस्यापितुल्यत्वादिति । त
स्यासार्वत्रिकत्वात् । भ्रमत्वसंशयंविनानिश्चितविषयसंशयानुत्पत्तेरनुभविकत्वाच्च । अथतद्वतितत्प्रकार
कज्ञानत्वं । प्रामाण्यंतच्चज्ञानग्राहकेणगृहीतमेवेतिनतत्संशयः । नचास्मिन्निश्चितेपिप्रामाण्यसंशयान्नत
त्प्रामाण्यमितिवाच्यं । एतन्निश्चयादेवनिष्कम्प्यव्यवहारादितिचेत् । अस्तुतावद्विदंप्रामाण्यंतथाप्यनुव्यव

॥त्रिं०म०॥
॥७॥

सायानंतरं व्यवसायस्य प्रामाण्ये अर्थस्य तद्वत्त्वे च संशयस्यानुभवसिद्धत्वान्नार्थतद्वत्त्वं तस्य विषयः। ननु व्यव
सायस्येदं रजतत्वविशिष्टं विषयत्वेऽनुव्यवसीयमाने। तथा च यादृग्व्यवसायो विशेषितप्रकारविशिष्ट
एव धर्म्यनुव्यवसायेन भासते। अन्यथा विषयांशे तस्य निर्विकल्पकत्वे इदं रजतं जानामीति तदाकारानुपपत्तेः।
अतो धर्मिणीदंत्वरजतत्ववैशिष्ट्यमनुव्यवसायेन गृहीतमिति धर्मिणि स्वतः प्रामाण्यग्रहे रजतत्ववैशिष्ट्ये
पि स्वतः प्रामाण्यज्ञानमवर्जनीयं। अत एव धर्म्यंशे केऽपि न प्रामाण्यसंशयः प्रतीतिश्चेत्थमेव। इदं रजतं च जा
नामीति चेन्नानुव्यवसायः। बहिर्विशेष्यकमनसोऽसामर्थ्यात् किं त्विदमिदंत्वेन रजतं रजतत्वेन च जानामीति। तत्र
इदंत्वरजतत्वे प्रकारत्वेन तद्वत्प्रकारकज्ञानवत्त्वं आत्मनि भासते। अन्यथा प्रकारवाचितृतीयाया असंभवः। रजतत्ववैशि
ष्ट्यस्य तद्वत्त्वे व्यवसायेऽपि तृतीयार्थोल्लेखापत्तिः। तथा च धर्मिणा इदंत्वरजतत्वप्रकारकज्ञानविषयत्वेनादृशज्ञा
नवत्त्वेनात्मनोऽनुव्यवसीयमानमिति न विषये तस्य निर्विकल्पकत्वम्। अत इदंत्वरजतत्ववैशिष्ट्यपुरोवर्तिनोऽ
नुव्यवसायविषय इति न स्वतः प्रामाण्यग्रहणं। तस्मादनभ्यासदशापन्नज्ञाने प्रामाण्यं परतो ज्ञायते सांशयि
कत्वादप्रामाण्यवदित्याचार्याः। ननु स्वग्राह्यत्वेऽपि कदाचित् परग्राह्यत्वात् स्वस्याप्यन्यापेक्षया परत्वादिष्टमेतत्।
परग्राह्यत्वाच्च सिद्धसाधनं। न च ग्राह्यप्रामाण्यापेक्षया परत्वं ग्राहकस्यापि ग्राह्यप्रामाण्यत्वेन तदपेक्षया पर
त्वाभावात् स्वग्राह्यप्रामाण्यापेक्षया परत्वे अप्रामाण्यप्रसंगादिति। उच्यते। अनभ्यासदशापन्नज्ञानप्रामा

॥त्रिं०व०॥
॥७॥

ण्यं न स्वाश्रयग्राह्यं। स्वाश्रयातिरिक्ततया ग्राह्यं वा। स्वाश्रयेऽसत्यपि तदुत्तरतृतीयक्षणवर्तिसंशयविषयत्वात् अप्रा
माण्यसंशयाजन्यसंशयविषयत्वाद्वा। अप्रामाण्यवत्। अर्थे निश्चितेऽपि निश्चयानंतरतृतीयक्षणे अर्थसंश
येन प्रामाण्यसंशयं विनेति नार्थे व्यभिचारः। विवादपदं न यावत्स्वाश्रयग्राहकग्राह्यं। स्वाश्रयनिश्चये तदुत्तर
तृतीयक्षणे संदिह्यमानत्वात् प्रामाण्यसंशयं विना संदिह्यमानत्वाद्वा अप्रामाण्यवत्। यद्वा अनभ्या
सदशापन्नैतज्ज्ञानप्रामाण्यमेतत्प्रामाण्यसंशयपूर्वकालीनैतज्ज्ञाननिश्चयाविषयः एतज्ज्ञाननिश्चयानंतरं
संदिह्यमानत्वादप्रामाण्यवत्। न च स्वशब्दस्य प्रामाण्यमात्रपरत्वात् तदाश्रयग्राह्यत्वबाधकाभावः स्वशब्द
स्य संबंधिशब्दत्वेन समभिव्याहृतपरत्वात्। अन्यथा स्वस्य परत्वात् परस्य स्वत्वात् तदेतत्त्वस्य तदेतदन्यत्वस्य
स्वपरसाधारणत्वात् स्वतः परतो वेति संशयो न स्यात्। प्रामाण्यस्य स्वग्राह्यत्वबाधात् परिशेषेणान्यथा ग्राह्यत्वं
परतो ग्राह्यत्वमिति विश्चित्। प्रथमप्रामाण्यज्ञाने व्यतिरेकिणा। ननु प्रामाण्यप्रसिद्धिं विनाऽस्य ग्रहणे कथमनुमानं॥
अथ व्याघातदशायेन प्रमा तद्विषयसिद्धौ न दृष्टान्ते न ज्ञेयत्वादिना वक्तुः प्रमाविषयत्वमनुमेयं। तच्च सामान्यत
सिद्धं न साध्याप्रसिद्धिः विशेषापरिज्ञानान्नान्वयित्वसाधर्म्ये। न च प्रामाण्यं नानुगतं। किंतु प्रतिज्ञानं विष
यप्रकारभेदाद्भिन्नं। तथा च रजतज्ञानादिषु वृत्तिप्रकारानवच्छिन्नत्वादिसाध्ये न साध्याप्रसिद्धिमिति वाच्यं॥
वह्निज्ञानस्यापि विशेष्यावृत्तिप्रकारानवच्छिन्नत्वादिसाध्यमाने। पक्षधर्मताबलेन वह्निविषयप्रमात्व

।।मू० चिं० प्र०।।
।।८।।

पर्यवस्यतीति चेत् तर्हि प्रथमं कस्यापि स्वार्थे प्रामाण्यानुमानेन स्यात् प्रामाण्यनिषेधरूपस्य परकीयव्याघातस्य त
दानुपस्थितेः स्वयं प्रामाण्यनिषेधस्य प्रामाण्यधीपूर्वत्वात् प्रामाण्यमेव विज्ञाय अप्रामाण्यनिषेधेन परव्याघातस्य।
अज्ञानाच्च प्रवृत्तिसंवादविसंवादाभ्यां तद्धेतुज्ञाने वैचित्र्यानुमानेन तत्तद्रूपप्रामाण्यस्य विविच्य प्रतीतिरिति। उच्य
ते। प्राथमिकीयसंस्कारविशिष्टायाः स्वप्रकारकत्वेन तद्वति तत्प्रकारकज्ञानत्वप्रामाण्यमात्रस्य तद्वत्ता हि नादसाध्यमा
नेन सर्वेनाममहिम्ना पक्षधर्मताबलाद्वह्निज्ञानस्य विशेष्यावृत्त्यप्रकारकत्वादेः पर्यवस्यति। स्वतः प्रामाण्यग्रहे तन्नि
षेधाप्रसिद्ध्या प्रामाण्यज्ञानस्यान्यथोपपादयितुमशक्यत्वादिति संप्रदायः। वयं तु ब्रूमः। प्रथममप्रामाण्याभावत्वेन प्रा
माण्यव्यतिरेकिणा साध्यतां तत एव निष्कंपप्रवृत्तेः। तदेव वा सिध्यतु पक्षधर्मताबलेन तद्वति तत्प्रकारकज्ञानत्वमप्रा
हा प्रसिध्यतीति तदनंतरमथो ~~अवह्नौ वह्नित्वप्रकारकत्वेन विशेष्यावृत्तिप्रकारकत्वेनाप्रामाण्याभावो~~ सिध्यतीति वक्ष्यते
तथाप्ययं वह्नित्वेनानुभववान् वह्नित्वाभाववति वह्नित्वप्रकारको न अवह्निवृत्तिप्रकारको न विशेष्यावृत्तिप्रकारको नु
वह्नित्वप्रकारकत्वे सति वह्न्यविशेष्यको न वह्नित्वव्यधिकरणप्रकारावच्छिन्नो न वह्निवृत्तिप्रकारको वा दाहसमर्थवि
षयप्रफलजनकत्वे सति वह्नित्वप्रकारकनिश्चयत्वात् दाहसमर्थविशेष्यकवह्नित्वप्रकारकनिश्चयत्वाद्वा। यन्नैवं त
न्नैवं। यथा वह्न्यप्रमा। तत्र बाधावतारान्न तत्संशयः। उपनीतं च प्रथमं वह्नित्वाभाववति वह्नित्वेन ज्ञानं मम न वेति संशयप्रा
माण्यमनभ्यासे वा गृह्यते मानान्तरेण वेति सर्वजनीनं। एवं च वह्न्यप्रमायां वह्नित्वाभाववति वह्नित्वप्रकारकत्वादि

।।हेरंब।।
।।८।।

समर्थप्रवृत्तिजनकत्वाभाववत्या व्याप्तिग्रहे अप्रामाण्यव्यापकहेतुत्वाभावाभावरूपहेतोरप्रामाण्याभावरूपं साध्यं सिध्यति
न च व्यापकतया हेतुत्वाभावे गृहीते तद्भाव एव हेतुना साध्यते। यत्र तत्र व्यापकहेतुत्वाभावस्य ज्ञायते तत्र साध्यप्रसि
द्धिरंगं तां विना तज्ज्ञानात्। यत्र तु भाववव्यापकत्वहेतुत्वाभावस्य तत्र तदंगतेन विनापि व्यतिरेकव्याप्तिग्रहात्। अत एव
तत्र व्यापकताकत्वाभावस्य गृहीतेत्याकाशत्वेनाप्रसिद्धस्य अन्योन्याभावः सिध्यति। विशेषणज्ञानं विना
कथं प्रामाण्यविशिष्टानुमितिरिति चेत् प्रथमं न कथंचित् ज्ञानप्रामाण्यमित्यनुमित्यनंतरं तेनैव हेतुना तत्र प्रामा
ण्यविशिष्टानुमितिः। अभावविशेष्यकप्रतीत्यनंतरमभावत्वे तत्त्वमिति ज्ञाने चेत् एवं च वह्नित्वप्रकारकज्ञानत
द्वति तदभाववति तद्वति संशयानन्तरं तदभाववति तत्प्रकारकत्वव्यतिरेकः सिद्धस्तद्वति तत्प्रकारकत्वमादाय सिध्य
ति। न तृतीयप्रकाराभावात् न तेन विना तस्योपसंहर्तुमशक्यत्वात् ज्ञाननियतत्ववत्। यद्वा वह्नित्वप्रकारकत्वे न वह्नि
त्वाभाववद्विशेष्यके। वह्नित्वाभाववद्विषयकत्वे सति तत्प्रकारकत्वात्। यन्नैवं तन्नैवं यथा वह्न्यप्रमेति व्यतिरेक्यन्तरात् सि
द्धिः। अथ नैयायिकविषयतापक्षे अयं वह्नित्वेनानुभवः अवह्निवृत्तिवह्नित्वप्रकारकविषयताको न वह्नित्वासमानाधिक
रणवह्नित्वप्रकारकविषयतावान् विषयताश्रयपावृत्तिप्रकारको न वृत्तिसाध्या वह्निवृत्तिवह्नित्वप्रकारकविषयताक
त्वविषयताश्रये वृत्तिप्रकारकत्वं वा ध्येति सिध्यति। ननु प्रथमसाध्याप्रसिद्धिः। वह्नित्वमवच्छिन्नविषयताश्रयो न वह्नि
विषयताया विशेष्यवृत्तित्वात् न विषमत्वेन सिद्धसाधनं। अन्ये तु यः वह्नित्वमेव वह्निविशेषणावृत्तिविषयतासा

॥चिं०प्र०प्र०।
॥१०॥

विशेष्यवृत्तिविषयताया अभिन्नेति न सा वह्निसमानाधिकरणधर्मानवच्छिन्नेति न सिद्धसाधनमिति । न च मणिज्ञा
नस्य प्रामाण्यानुमाने मणिप्रभायां मणित्वभ्रमे ऽनैकान्त्यं तस्य मणिप्रापके मणिगोचरप्रवृत्तिजनके च मणित्वप्रकारकत्वेन
श्रयत्वमेनेवेति वत्त्वमिति वाच्यं मणिज्ञानप्रविषयज्ञानेनेति न्नविषयतया मणिगोचरप्रयत्नानुत्पादात् । मणि
प्राप्तेनान्तरीयकत्वात् । ज्ञानप्रयत्नयोस्समानकालत्वेप्यनुमानस्मरणयोरिव मनसा कार्यकारणभावग्रह इति
नासिद्धिः । अत्रावसाय्यके च निर्विषयकस्य प्रथमं सपक्षत्वेनानिश्चयान्नासाधारण्यं तथा अयं पृथिवीत्यनु
भवः पृथिवीत्वाभाववति पृथिवीत्वप्रकारको न पृथिवीवृत्तिप्रकारको न पृथिवीत्वप्रकारकत्वे सति पृथिव्यविशेष्य
कोऽनविशेष्यावृत्तिप्रकारको न पृथिवीत्वव्यधिकरणप्रकाराविच्छिन्नो न पृथिव्यवृत्तिप्रकारको वा । गंधवद्विशेष्यक
पृथिवीत्वप्रकारकनिश्चयत्वादिति प्रतिरेकी । पृथिवीत्वमः पृथिवीत्वाभाववति पृथिवीत्वप्रकारकत्वे इति नन्वत्र मते
नसिद्धसाधनं न गंधवद्विशेष्यकत्वेन व्यभिचारः पृथिवीत्ववति पृथिवीत्वप्रकारकत्वादिकमर्थो ऽसिद्ध्यतीति वि
षयतापक्षे अयं पृथिवीत्वेनानुभवो न पृथिवीवृत्तिपृथिवीत्वप्रकारकविषयताकः पृथिव्यवृत्तिपृथिवीत्वप्रका
रकविषयताको न च पृथिवीत्वप्रकारकविषयताकत्वादिकमर्थो ऽसिद्ध्यति । अन्ये तु पृथिवीत्वासमानाधिकरण
प्रकाराविच्छिन्नविषयताकत्वाभाव साध्यः गंधासमानाधिकरणप्रकारकगंधसमानाधिकरणप्रकारकवि
षयताप्रतियोगिज्ञानत्वात् । तेन स्वज्ञापयव्यवच्छेदानिश्चयत्वेवाविवक्षितमित्याहुः । ज्ञाता पृथिवीत्यनुभवः पृथि

॥हेरंब॥
॥१०॥

व्यंशे प्रमैव । ज्ञानमात्रमप्रमारूपे च समूहालंबनेन व्यभिचारः । अंशे तस्यापि प्रमात्वात् । विशेष्यभेदेन विषयताभेद इ
न च प्रकारभेदेन विषयताभेदो मानाभावात् पृथिवीत्वासमानाधिकरणपृथिवीत्वप्रकारकविषयताको न विशेष्य
तानिरूपावृत्तिप्रकारताको न वेति साध्यं । पृथिवीत्वतोऽस्त्वियं पृथिवीत्यनुभवः पृथिवीत्वसमानाधिकरणधर्मप्रका
रकपृथिवीविशेष्यकविषयताकः पृथिवीत्वव्यधिकरणधर्मानवच्छिन्नपृथिवीविशेष्यकविषयताकः पृथिव्यवृत्ति
धर्मानवच्छिन्नपृथिवीवृत्तिविषयताको वा । गंधासमानाधिकरणधर्मप्रकारकविषयताप्रतियोगिज्ञानत्वात् ।
अगंधवद्वृत्ति पृथिवीत्वप्रकारकविषयताकत्वात् । गंधसमानाधिकरणविषयताप्रतियोगिज्ञानत्वादित्यन्ये ।
साध्याप्रसिद्धिः । किं तथापि वत्सिध्यति । एवं यत्स्वरूपकव्याप्यतया यद्गृहस्नेहसमर्थप्रवृत्तिजनकत्वकरण
दिकमवगतं तद्वृत्ति तत्प्रकारकज्ञानत्वमेव प्रामाण्यं । लिंगं वा । ननु वह्निज्ञानस्य दाहसमर्थविषयकत्वेन दाहसम
र्थोयमिति व्यवसायगम्यत्वं ज्ञानविषयतया स्वतर्द्विषयत्वात् । नापि तदनुव्यवसायगम्यं पुरोवर्तिदाहसामर्थ्यस्य
तद्गोचरत्वात् । व्यवसायोपनीतदाहसामर्थ्यस्य भानेतद्सामर्थ्यात् । अन्यथा व्यवसायोपनीतस्य पुरोवर्तिनि
वह्नित्वस्यानुव्यवसायविषयत्वे स्वतःप्रामाण्यग्रहापत्तेः । एवं पृथिवीजलज्ञानयोर्गंधस्नेहवद्विषयत्वमपि न
पपन्नमिति चेत् । वह्नित्वप्रकारकानुव्यवसाये सति तत्रविषये दाहसमर्थत्वज्ञानानन्तरं स्मृत्युपनीतवह्निव्यवसा
येस्मृत्युपनीतदाहसमर्थविषयकत्वं । एवं जलपृथिवीज्ञानयोः स्मृत्युपनीतयोर्ज्ञानोपनीतस्नेहगंधवद्विषयकत्व

॥ वि॰ प्र॰ ॥
॥१०॥

मनसा परिच्छिद्यते गंधादिमत्त्वेन मम पृथिवीत्वाद्यनुभव इति तत्र गंधादिमत्त्वपरिच्छेदानंतरम् अनुभवात्। स्मृत्युपनी
तधूमादौ व्याप्तिपरिच्छेदवत्स्वरूपावच्छेदेन सोपनयज्ञानवद्भाते पृथिवीत्वज्ञाने गंधवद्विषयकत्ववत्स्वरूपावच्छेदेन गंध
वति पृथिवीत्वोपनायनानंतरम् इयं पृथिवीति पृथिवीत्वप्रकारकानुभवोपनीते पृथिवीत्ववति पृथिवीत्वप्रकारक
त्वं तथा तत्र च ज्ञाने घटत्वप्रकारकत्वविरहवत्॥ पृथिव्यवृत्तिप्रकारकत्वविशेष्यावृत्तिप्रकारकाभाववत्त्वं वा प्रा
माण्यमनेनैव परिच्छिद्यतामिति स्वत एव प्रामाण्यग्रह इति चेन्न। ज्ञानांतरोपस्थापितज्ञानवृत्तिप्रामाण्यग्रहेऽप
रतस्त्वानपायात्। यावज्ज्ञानग्राहकग्राह्यत्वं यावत्स्वाश्रयग्राहकग्राह्यत्वं तज्ज्ञानविषयकजन्यज्ञानाजन्यजन्यज्ञान
विषयत्वं वा स्वतस्त्वं तदन्यथा ग्राह्यत्वं हि परतस्त्वं मनसा चैव प्रामाण्यग्रहस्य तज्ज्ञानविषयकजन्यज्ञानजन्यत्वे
न परतस्त्वहानिः। व्यतिरेकेण न तत्तज्जातीयत्वेनान्वयिना प्रामाण्यानुमानं। यथा इदं शरीरज्ञानं प्रमा करचरणव
ति शरीरज्ञानत्वात् स्वरूपज्ञानवत्। न च करचरणानवति करचरणे तत्स्वत्वज्ञाने व्यभिचारः। शरीरांशे तस्य
प्रमात्वात्। एतेन करचरणवति शरीरज्ञानत्वादि यत्करचरणवत्त्वेनोपलक्षणं आवृत्त्योपलक्ष्यस्याभावात् न च वि
षयतया ज्ञानविशेषणं करचरणवत्त्वप्रकारकज्ञानत्वस्य व्यभिचारात्। अशरीरेऽपि तादृशज्ञानसंभवात् शरी
रमिति ज्ञाने तदसिद्धेः अविपर्ययविशेषणत्वे करचरणप्रकारकत्वेन शरीरज्ञानत्वस्य व्यभिचारात् शरीरांशे तस्या
पि सत्त्वात्। करचरणादिमद्विषयकत्वात्। नापि करचरणशून्ये यच्छरीरत्वेन ज्ञानं तदन्यत्वे सतीति विवक्षितं॥
तदन्यत्वस्य तद्विषयत्वविषयत्वसमव्याप्तेः इति करचरणशून्यविषयकशरीरज्ञानान्ये शरीरज्ञानत्वादिसाध्यः॥

॥ हेरंब ॥
॥१०॥

तथा चासिद्धिः। शरीरज्ञानस्य तदन्यशरीरत्वादिविषयकत्वनियमात्। न च करचरणादिशून्ये शरीरत्वेन ज्ञानं यच्छ
भवतीति विवक्षितं। तनीयार्थस्य विषयत्वे उक्तदोषात् अभावादिति निरस्तं करचरणवद्विशेष्यकशरीरत्वप्रकारकज्ञा
नत्वस्य हेतुत्वात्। शरीरस्यामेव करचरणवत्त्वं शरीरस्य विशेषणत्वात्। विषयतापक्षे करचरणादिशून्यनिष्ठशरीरत्व
प्रकारकविषयताप्रतियोगित्वशून्यत्वे शरीरज्ञानत्वादिहेतुः। ननु अगृहीतप्रामाण्ये परप्रामाण्यनिश्चयरूपे अनव
स्थानात्। नापि ज्ञायमानप्रामाण्यं स्वतः प्रामाण्यग्रहापत्तेः। अतो गृहीतप्रामाण्यमेव ज्ञानं परप्रामाण्यनिश्चयत्वरूपमाकु
र्यात्। तथा च व्यवसायो गृहीतप्रामाण्य एव स्वविषयनिश्चायकः तु द्विविषयनिश्चयार्थं तत्प्रामाण्यनिश्चये न भवेत् अथ
संपूर्णप्रामाण्यदर्शनात् ज्ञानमात्रादर्थनिश्चयः तर्हि प्रामाण्यानुमिते रथ प्रामाण्यदर्शनान्न तत्रापि प्रामाण्यनिश्चय इति
चेत् न ब्रूमो ज्ञानप्रामाण्यनिश्चयादेवार्थनिश्चयः किंतु यत्राप्रामाण्यशंका नास्ति करतलामलकादिज्ञाने तत्र व्यवसायादे
वार्थनिश्चयः इति तत एव ततः प्रवृत्तिः। यत्र चाभ्यासदशायाम् अप्रामाण्यसंशयेनार्थनिश्चयं प्रति प्रतिबंधः संदेहस्तत्र
प्रामाण्यनिश्चयाधीना ज्ञानादर्थनिश्चये सति निःकंपप्रवृत्तिः नान्यथेति सर्वानुभवसिद्धं। अतः अगृहीतप्रामाण्यमेव ज्ञानं
प प्रामाण्य~~[illegible]~~ निश्चायकमिति। अप्रामाण्यशंकाकलंकाभावात्। यत्र तु प्रामाण्यज्ञाने अप्रामाण्यशंका तत्र प्रामाण्यसंशयः
तु तत्र प्रामाण्यज्ञानप्रामाण्यनिश्चयादेव प्रामाण्यनिश्चयः। एवं यावदप्रामाण्यशंका ज्ञानप्रामाण्यनिश्चयादेवं निश्चयः
न चैवमनवस्थानमेरे प्रामाण्यज्ञानस्य ज्ञानाभावेन कोटिस्मरणाभावेन विषयांतरसंचारेण वा प्रामाण्यसंशयानव

॥वि०सू०प्र० ग्रहाभावात्। अन्यथा तद्ग्रहे प्रामाण्यस्य ज्ञानानुमितिग्राह्यत्वेनानवस्था स्यात्। गुरुमते च प्रामाण्यस्य स्वग्राह्यत्वेन स्व
॥११॥ ग्राह्यं स्वरूपप्रामाण्यव्यवहितं तत्त्वात्। किंतु परग्राह्यत्वेनानवस्थानात्। परिशेषानुमानेन प्रमाणान्तरेणाग्रहात्। तथा च
तत्प्रामाण्यस्यापि स्वग्राह्यत्वमन्येनैवेत्यनवस्थैवाय तु व्यवसायस्य प्रामाण्यनिश्चयादेव प्रवृत्तेर्न तस्यापि प्रामाण्या
नुसरणमिति नानवस्था। न च प्रामाण्यसंशयादौ विसंवादवर्जितो विषयसंशय इति वाच्यं निश्चिते संशयाभावात्।
अन्यथा स्मृतौ गृहेऽपि तत्संशयेनानवस्थेति। तदसत्। यदि प्रामाण्यसंशयान्न विषयसंशयः निश्चितत्वात् तदा विषय
निश्चयार्थं प्रामाण्यनिश्चयो व्यर्थः प्राथमिकविषयनिश्चयादेव निष्कम्पप्रवृत्त्युपपत्तेः। न हि विषयसंशयमनादृत्य
प्रामाण्यनिश्चयः प्रवृत्तिहेतुरिति। उक्तं। अन्यसंशयादन्यत्र निश्चितेऽपि संशय इति चेन्न। अनुभवैकवेद्येन स्वस्यैव
मेव प्रामाण्यसंशयस्य विषयसंशयहेतुत्वमुक्तमनुमते च ज्ञानविषयत्वमपि प्रामाण्यसंशयमासाद्य विषयसंशयस्य ॥हेरंब॥
॥ ननु लिङ्गपक्षव्याप्त्यादीनां ज्ञानस्य प्रामाण्यावधारणेनानवस्था। अनवधारणे हेत्वसिद्धिः। अथ लिङ्गादिज्ञाने स्वविषयाव ॥११
धारणे कर्तव्ये स्वप्रामाण्यज्ञानं नापेक्षते अनुमानमात्रोच्छेदप्रसंगात्। लिङ्गादिनिश्चयस्य च स्वकारणाधीनस्य सत्त्वेऽसि
द्धत्वादिति चेत्। तन्न प्रामाण्यसंशयेन लिङ्गस्य संदेहात्। न हि लिङ्गज्ञाने न प्रामाण्यसंशयोऽनुभवविरोधादिति। उ
च्यते अप्रामाण्यशंकाभावे लिङ्गादिज्ञानस्यैवापि निश्चायकत्वात् तर्कलंके तर्केवगतिः। यत्तु व्यवसाये क्वचिदप्रा
माण्यशंका क्वचिन्नेति तथापि वाच्यं। एवं बहुवित्तव्ययायाससाध्ये स्वर्गसाधने याग इति ज्ञानमगृहीतप्रामाण्यं प्रामा

ण्यानुमितिपूर्वमेव तस्य नाशात्। किंतु तज्ज्ञानसमानविषयकप्रामाण्यशंकाशून्यं ज्ञानान्तरमेव। नन्वेवं बहुवित्तव्यया
याससाध्ये निष्कम्पप्रवृत्त्यनुपयोगि निष्फलं प्रामाण्यज्ञानमिति किं तदुपायानुसरणेनेति चेत्। न। स्वर्गोपायोऽने
याग इति ज्ञानस्य प्रामाण्ये निश्चिते तत्समानविषयकज्ञानान्तरे प्रामाण्यशंका न भवतीति ज्ञानान्तरमगृहीत
प्रामाण्यमपि स्वार्थनिश्चयरूपं निष्कम्पप्रवृत्तिं जनयतीत्यप्रामाण्यशंकाप्रतिबन्धद्वारा निष्कम्पप्रवृत्तावुपयुज्यते
तज्ज्ञानमिति निष्फलं। यत्त्वनुमानस्य निरस्तसमस्तविभ्रमाशंकस्य स्वत एव प्रामाण्यग्रह इत्युक्तं। तन्न मम तु हि ज्ञान ज्ञा
न्ने त्वमनुमितेः प्रामाण्यनियतमनुव्यवसायेनोपनीतमतो विशेषदर्शनान्न प्रामाण्यशंकेति प्रामाण्यनिश्चयादिवा
प्रामाण्यशंकाविरहादर्थनिश्चयनिष्कम्पव्यवहार इत्यभिप्रायः। वस्तुतः परतःपक्षे न क्वचिदपि प्रामाण्यग्रहः प्रवर्तक
इति एवमनुव्यवसायस्य प्रामाण्यनियतत्वान्न तथा प्रामाण्यशंका। न घटज्ञानं जानामीति प्रत्येति। न वा घटं जानामी घटंजाना
तित्वमेव्यनुव्यवसाये तद्गतत्वादिकं व्यवसायप्रकारत्वेनोल्लिख्यते। तत्र तथैव। यत्त्वभ्यासदशायां निष्कम्पसंवलितप्रवृ
त्तरप्रवृत्तिदर्शनात् प्रामाण्यं स्वत एव गृह्यते अन्यत्र परत इति। तन्न। विशेष्यनिश्चये तत्ताभावप्रतियोगिप्रकारान
वच्छिन्नत्वादिके प्रामाण्ये स्वतो ग्रहीतुमशक्यत्वमिति परत एव गृह्यते। इदमिति प्रवृत्तिस्तत्र करचरणादिमति शरीर
ज्ञानवत्त्वादिविशेषस्यानुव्यवसायेनाग्रहात् प्रामाण्यशंका स्यात्। व्यवसायादेव प्रामाण्यज्ञानं न प्रवर्तकमित्युक्तं॥
झटिति तत्समवधाने तु स्वकरणाधीने तदुक्तं। न हि पिपासुना झटिति प्रवृत्तेरतरासमर्थो वा प्रवृत्तिरभ्युपेतेति पिपा
सापशमनाशक्तिः प्रत्यक्षेति। उत्पद्यतेऽपि प्रमा परतो। ननु स्वतो ज्ञानसामग्रीमात्रात्तज्जन्यत्वेनाप्रमापि प्रमा स्यात्॥

॥वि०मू०॥ ॥१२॥ अन्यथाज्ञानमपिसत्यंस्यात् । ज्ञानसामान्यंदोषानुप्रवेशादप्रमेतिचेत् । तर्हिज्ञानविशेषवदप्रमाप्रमाविशेषःस्यात् ॥
ज्ञानसामग्रीजन्यत्वात् । तस्मात्प्रमाप्रमयोर्वैचित्र्यंगुणदोषजन्यत्वं अथयत्रगुणदोषौविनातयोरभावस्तत्रज्ञा
नसामग्र्येवनास्ति । तत्सत्त्वेज्ञानमात्रोत्पत्तिप्रसंगादितिचेत् । न । विशेषविनाकृतसामान्यस्याभावात् तत्साम
ग्रीमादायसामान्यसामग्रीत्वाविनाभावेनवा । अन्यथाकार्यविशेषकारणविशेषोच्छेदः । ननुयथैकजातीयसामग्री
सत्त्वेघटयोर्भेदोयमजयोर्वैधर्म्यंचतथाप्रमाप्रमयोर्भेदोवैरूप्यंचभवति । अथानुगतव्यवहारात्प्रमात्वमनुग
तमितिप्रमामात्रेऽनुगतोहेतुर्वाच्यः । अनुगतकार्यस्याननुगतादनुत्पत्तेरितिचेत् । न । प्रमात्वस्योपाधित्वेनकार्य
तावच्छेदकत्वेमानाभावात् ॥ कार्यमात्रवृत्तिधर्मत्वस्यनीलघटत्वघटज्ञानत्वादौव्यभिचारात् । अथप्रमाज्ञानहे
जन्य त्वतिरिक्तहेतुजन्याज्ञानत्वेऽप्रमावदितिचेत् । न । प्रमायाज्ञानत्वेनतद्धेतुजन्यतयासाध्येऽभावत् । ज्ञानाजनकज ॥हेरं च॥
किं च न्यत्वेविरोधात् । अप्रमायांतदसिद्धेः । अर्थविशेषणत्वात्व्यावर्त्याप्रसिद्धेश्च । किंचिज्ज्ञानहेत्वपेक्षयासर्वज्ञानहेत्वपेक्ष ते ॥१२॥
यावातिरिक्ततदिन्द्रियादिभिःसिद्धसाधनात् । नापिज्ञानसामान्यसामग्र्यतिरिक्तसामग्रीजन्येतिसाध्यंपूर्ववत्सिद्ध
साधनाद्विरोधाच्च । नचसामान्यविशेषयोःसामग्रीद्वयं । प्रमायाज्ञानभिन्नत्वापत्तेः । अन्यथासामग्रीकालेभेदा
सिद्धेः । तस्यकार्यभेदकत्वात् । एतेनज्ञानसामान्यहेत्वतिरिक्तहेतुजन्येतिसाध्यंप्रत्युक्तं । सकलज्ञानत्वेनाप्रा
येन्द्रियादिभिःसिद्धसाधनंज्ञानत्वाभिप्रायेऽत्वसिद्धेः नापिज्ञानत्वावच्छिन्नकार्यतान्यकार्यत्वप्रतियोगिककारण

जन्येतिसाध्यंज्ञानत्वस्यनित्यानित्यवृत्तितयाकार्यतानवच्छेदकत्वात् । अथयद्धर्माश्रयस्यासत्त्वंहेत्वधीनंत
त्कार्यतावच्छेदकंज्ञानत्वेचतथा । नचासतःसिद्धेर्व्योमादिसाधारणसत्त्वमात्रस्यहेत्वनियम्यत्वादितिचेन्न । यदा
लिंगितस्यहिस्वरूपंहेत्वधीनंतत्कार्यतावच्छेदकंलाघवात् । ज्ञानत्वंतुनथात् । अतिरिक्तज्ञानत्वेतिकरणे [illegible] इन्द्रि
यादिभिर्यथायथंसिद्धसाधनं । तेषांप्रत्येकंज्ञानमात्रहेतुत्वात् । एतेनप्रमात्वंज्ञानत्वावच्छिन्नकार्यत्वनिरूपितका
रणताभिन्नकारणताप्रतियोगिककार्यतावच्छेदकं । ज्ञानत्वसाक्षाद्व्याप्यधर्मत्वादप्रमात्ववदितिनिरस्तं । प्रमात्वस्य
नित्यवृत्तित्वात् । अनित्यप्रमात्वंतथा । कार्यमात्रवृत्तिधर्मत्वादित्यपिनीलघटत्वादिनाव्यभिचारि । अनित्यप्रमाप्र
माप्रमास्यहेतुभिन्नहेतुजन्याजन्यत्वादप्रमावदितिचेत् । दोषस्यापिज्ञानादेःस्वविषयप्रमाहेतुत्वेनप्रमायांसा
ध्याप्रसिद्धेः घटदृष्टान्तत्वेतथैवव्यभिचारात् । शंखादौपीतशंखज्ञानस्यापिप्रमात्वात् । करणव्यक्तिभेदजन्यत्वे
नसिद्धसाधनाच्च । अथप्रमा । अप्रमाव्यावर्तकधर्मावच्छिन्नकार्यताप्रतियोगिकारणजन्या अप्रमाविजातीयकार्य
त्वात् । घटवत् । यद्वाप्रमाअप्रमाचासमानाधिकरणरूपानिरूपितकार्यत्वप्रतियोगिककारणजन्यानस्यात् ॥
अप्रमास्यादितिचेत् । न । अप्रमाव्यावृत्तधर्मावच्छिन्नकार्यत्वस्ययोगस्यतत्प्रतियोगिकारणमिन्द्रियादीनितज्ज
न्यत्वेनसिद्धसाधनात् । अप्रमासाधारणकारणव्यक्तिजन्यत्वंवाप्रमातादात्म्यप्रयोजकमितितर्कोऽप्यप्रयोजकः ॥
अथअनित्यप्रमा । प्रमाऽप्रमान्यतरप्रतिबन्धकजन्या । प्रमाप्रमान्यतरत्वात् । अप्रमावत् । चक्षुषप्रमा । चाक्षु
षप्रमाजनकजन्या । अनित्यप्रमात्वात् । रासनप्रमावदितिचेत् । न । प्रमाजनकासाधारणव्यक्तिभेदस्यात्र

॥चिं०म०प्र०॥
॥१३॥

माप्रतिबंधकत्वेन चाक्षुषप्रमाजनकत्वेन च सिद्धसाधनात्॥ एतेन प्रमात्वविरोधो नुभवप्रतिबंधकजन्या अनित्या
नुभवत्वात् अप्रमावत् । दूरात्पुरुषस्य स्थाणुतया ज्ञाने सन्निधौ च भूयोवयवेंद्रियसन्निकर्षस्य विरोधिस्त्वा एव
नुभवप्रतिबंधकत्वे पुरुषज्ञानजनकत्वं च दृष्टं अप्रमायां तु पित्तादिलिंगादिकस्य च तथात्वमिति निरस्तं प्रमात्वे
न कचित्किंविशेषस्याप्रमाप्रतिबंधकत्वं प्रमाजनकत्वं वा तिसिद्धसाधनादिति न प्रमायामतिरिक्तगुणसिद्धिः।
किं च प्रत्यक्षप्रमादावनुगतस्यार्थातिरिक्तस्य गुणस्याभावः इंद्रियसन्निकर्षादीनां चाननुगमः । न च जात्यैव गुणे
दोषे वा प्रमाजनकत्वं गुणत्वं अप्रमाजनकत्वं दोषत्वमिति प्रसक्तं तन्मात्रजनकत्वेन वा सिद्धिरित्युच्यते। एवमप्रमा
पि स्वत एव स्यान्न परतः प्रमावदसाधारणकारणादेव तदुत्पत्तेर्दोषस्य तत्राहेतुत्वात् । अथ ज्ञानसामग्रीसत्वे
पि विशेषादर्शनादिपित्तादेरनुविधानादप्रमायां दोषो हेतुरिति चेत् तर्हि विशेषदर्शनपित्ताद्यभावादि
ते सत्येव विषये प्रमा । तदभावान्नेति प्रमायामावश्यककारणापेक्षेति कथं परतस्त्वं । अपि च नियमगर्भः का
र्येकारणभावो नियमश्च न व्यक्त्योरेव व्यभिचारादतिप्रसंगाच्चेति नियमनिरूपकमनुगुणमनुगतमास्थे
यं । एवं चाप्रमायामिव प्रमायामपि तद्भावकं कारणमनुगतमावश्यकं । किंच यत्कार्यं यत्कार्यविजातीयं त
त्कारणविजातीयकारणजन्यं यथा घटविजातीयः पटः । अन्यथा कार्यवैजात्यस्याकस्मिकतापत्तेः । घटज्ञा
नजातीयमपि कार्यं न हि जातीयकार्यकारणविजातीये घटेंद्रियसन्निकर्षादिजन्यमिति न व्यभिचारः॥

एवं च अनित्यप्रमा अप्रमातस्मरणविजातीयकारणजन्या अप्रमाविजातीयकार्यत्वात् । घटवत् । एवं चानुगतस्य प्रमा
हेतुत्वे प्रमात्वविरोध्यनुभवप्रतिबंधकजातीयजन्या जन्यानुभवत्वाद प्रमावदित्यादावपि न सिद्धसाधनाप
पि वा नित्यप्रमात्वं कार्यतावच्छेदकं बाधकं विना कार्यमात्रवृत्तिधर्मत्वात् । अप्रमात्ववत् । नीलघटत्वं तु विशिष्टं न
कार्यतावच्छेदकं प्रत्येकानुगतप्रयोजकत्वादेव विशिष्टसिद्धेरर्थः समाजः घटज्ञानत्वादौ तु बाधकं । अस्तु वा
तत्राप्यनुगतप्रयोजकं दृष्टहेतुकत्वं । अन्यथा कार्यमात्रे नादृष्टहेतुः स्यात् । एवमनित्यप्रमात्वमनित्यज्ञानत्वावच्छि
न्नकार्यत्वप्रतियोगिककारणतातिरिक्तकारणताप्रतियोगिककार्यतावच्छेदकं । अनित्यज्ञानत्वव्याप्यकार्यताव
च्छेदकधर्मत्वात् । अप्रमात्ववदित्यनित्यप्रमायामप्रमाव्यावृत्तानुगतहेतुसिद्धिः । अन्यथानुगतकार्यानुत्पत्तेः । तथा त
नित्यप्रमात्वमप्रमाकारणतानवच्छेदकरूपावच्छिन्नकारणताप्रतियोगिककार्यतावच्छेदकं प्रमात्वनिष्ठकार्यतावच्छेदकत्वात् । घ
टत्ववत् । चाक्षुषप्रमात्वं चाक्षुषाप्रमाकारणतावच्छेदकरूपानवच्छिन्नकारणताप्रतियोगिककार्यतावच्छेदकं । चाक्षुषप्रमा
त्वनिष्ठकार्यतावच्छेदकत्वात् । घटत्ववत् । अनित्यरजतप्रमात्वं रजताप्रमाकारणतावच्छेदकरूपानवच्छिन्नकारणताप्रतियो
गिककार्यतावच्छेदकं रजतप्रमात्वनिष्ठकार्यतावच्छेदकत्वात् । घटत्ववत् । अन्यथा नियामकं विना चाक्षुषादिरजतज्ञानं किं
चिद्रजतत्वप्रकारकं किंचिद्रजतत्वप्रकारकमिति नियमो न स्यात् । ज्ञानसामग्र्यास्तुल्यत्वात् । यत्तु प्रमाया
असाधारणकारणजन्यत्वे साध्ये प्रमाजन्यत्वमुपाधिः । न च पक्षेतरत्वं । न चेश्वरज्ञानस्य प्रमात्वं तत्पक्षस्यापक्षत्वात्:

चिं०मू० उभयपक्षसिद्धव्यावर्तकत्वं तत्रानेनतु व्यावर्त्यस्योभयसिद्धिः गौरवात् व्यतिरेकस्यासाधारणत्वं च पक्षेतरस्यानुपाधित्वे बीजं ॥
॥१४॥ तद्वात्र नास्ति भगवज्ज्ञानस्य तन्मते पक्षत्वादिति । तत्राविपक्षबाधकबलेन हेतोः साध्यव्याप्यत्वेनोपाधेः साध्याव्यापक-
त्वात् । नन्वस्तु प्रमायां दोषाभावो हेतुः । आगन्तुकभावानपेक्षज्ञानसामग्रीजन्यत्वमेव स्वतस्त्वं । यत्तु भावेन कारणीभू-
तदंडत्वादिवत्कारणत्वावच्छेदकत्वेन सामग्रीप्रदोपलक्षकृति । तन्न । जपाकुसुमादिसन्निधौ न प्रमा तदसन्निधौ स्फटि-
कादौ प्रमोत्पत्तेरनन्यथासिद्धत्वेन हेतुत्वादिति चेत् । न । भूयोवयवेन्द्रियसन्निकर्षविशेषदर्शनादिसमवधाने प्रमा तदभा-
वे त्वप्रमेति प्रमायां गुणो प्रमायां तदभावो हेतुरित्येवं किं न स्यात् । अन्यथा सदर्थविषयकत्वे सदर्थविषयकहेत्वभावो
न प्रयोजकः । ज्ञाने सदर्थविषयत्वानियमेन तदसंभवात् । सदर्थविषयत्वे ऽसदर्थविषयकारणाभावो हेतुः संभवति । प्रमा-
याः सदर्थमात्रविषयत्ववदप्रमाया असदर्थमात्रविषयत्वाभावादिति चेत् । न ह्यप्रमायाः सदर्थविषयता न स्यात् । हेत्वभावा-
त् । सदर्थमात्रविषयत्वे ऽसदर्थविषयहेत्वभावो हेतुरिति चेत् । तर्हि गुण एव तत्र हेतुः तदभावस्त्वसदर्थविषयत्वे प्रयोजकः
ने त्वेन गुणाभावस्य साधारणत्वात्तद्वसत्यमसत्यं च न स्यात् । गुणतदभावयोरनेकत्रासत्वादिति चेत् । न दोषाभावेपि तुल्य-
त्वात् । क्वचित्कश्चिद्दोष इति गुणेपि तुल्यं । गुणाभावादसन्मात्रविषयकमपि ज्ञानं स्यादिति चेत् । न । दोषादपि सन्मात्रविष-
यत्ज्ञानापत्तेः सर्वत्रैव विषये दोषो न संभवतीति चेत् । गुणाभावे तुल्यं । अथ विशेषदर्शनादिर्गुणस्तदभावश्चानुगत इति । हेरंब ॥
नैतौ प्रमाप्रमाहेतू किंतु दोषतदभावाविति चेत् । तर्हि पित्तादिर्दोषस्तदभावश्चानुगत इति न तावपि हेतू । स्वप्रमा ॥१४॥

यं स्वाभावस्य व्यभिचारश्च । अथ दोषत्वमेवं । न हि तत्तद्भ्रमहेतुत्वं तत् । आगौदोगतत्वादननुगमाच्च । नापि भ्रममात्रहेतुत्वं
पित्तादिदोषाननुगतत्वेन तदभावादसंभवाच्च । नापि प्रमाहेत्वभावप्रतियोगित्वं अन्योन्याश्रयात् । पित्तादेः स्वप्रमा-
हेतुत्वाच्च । नापि स्वप्रमाभिन्नप्रमाप्रतिबंधकत्वं । एवं हि प्रत्यक्षे प्रतिबंधकस्य सल्लिंगपरामर्शस्य दोषत्वापत्तेः अनुमितिः
प्रमा न स्यात् । तस्मात्क्वचित्कश्चिद्दोष इति चेत् । तर्हि गुणेपि तुल्यं । स्यादेतत् । प्रमाप्रमान्यतमं वा कुर्वती ज्ञानहेतुस्त । मं-
डूकवसाञ्जने दोषाद्दृशोरगत्वमस्त्वदभावे वंशप्रमेति तत्र दोषाभावः प्रमाहेतुरित्यन्यत्रापि तथा कल्पनात् । मं-
डूकवसा च नयन एव दोषो न त्वचीति त्वचा वंशप्रमैव । गौरोहमिति यत्रेद भ्रमहेतुर्दोषः संस्कारसत्वेपि मम शरीर-
मिति प्रमेति चेत् । न विशेषादर्शनस्य तत्र दोषत्वेन तु संस्कारस्य तदसत्वेन सिद्धेः । ननु हृस्वक्षः सन्निकर्षे । पिकशा-
दौ सजातीयसंयोगे प्रमा तदभावे नेति तत्र संयोगरूपो गुणः प्रमाहेतुरित्यन्यत्रापि गुणो जन्यते इति वाच्यं । ताव-
द्देशावतिकृराभासाभाकारे स हेतुः तेन विना तदभावात् । तत्रापि तावद्भ्रमायां स हेतुः सन्निकृष्टैकत्र प्रमायां स्ते-
नत्विनापि भावात् । तत्रापि च दोषाभावः कल्प्यो दोषजन्यत्वे त्वप्रमात्वापातात् । ननु विशेषदर्शनं प्रमाहेतुर्वि-
शेषादर्शनं तस्य हेतुत्वे दोषत्वे तदभावस्य हेतुत्वादिति चेत् । तर्हि दोषाभावत्वेन स हेतुर्न गुणत्वेन भावत्वेन वा । किंच वि-
शेषदर्शनप्रतिबंधकाः पित्तादयो दोषा आवश्यकत्वात् । न विशेषादर्शनं न च तेषां नानात्वेन विशेषदर्शनप्रतिबंध-
कतयानुगमे लाघवाद्विशेषादर्शनमेव हेतुरिति वाच्यं । क्वचित्कश्चिद्दोष इत्यननुगमात् । अन्यथापि पित्तादिति ।

।।चिं०म०
।।१५।।

प्रमा न स्यात् अननुगमात् भ्रमप्रमादेरिवानुगमेऽपि दोषाच्चेन्न भ्रमकूटस्य हेतुत्वात् सर्वत्र विशेषादर्शनमेव हेतुः पित्ता
देरननुगमेन तत्रोपक्षयादिति चेत् न। पित्ताद्युत्कर्षेण भ्रमोत्कर्षात् तु पित्तादेर्दोषत्वे च विशेषभ्रम एव कुतो न भवति। विशेषस्य
विशेषान्तरादर्शनादिति यदि तदानवस्था। किंच विशेषदर्शनेन प्रमामात्रे न वा प्रत्यक्षप्रमायां हेतुः व्यभिचारात्। तत्रापि
तद्धेतुत्वेऽनवस्थानाच्च। अथ प्रत्यक्षे इन्द्रियसन्निकर्षो गुणः अप्रमांशे तदर्थस्यासत्त्वेन सन्निकर्षाभावाद्दोषो हेतुः।
न च प्रमांशेऽपि स हेतुः अदोषप्रसंगात् प्रमांशस्याप्रमात्वप्रसंगाच्च साक्षात्कारित्वे चेन्द्रियसन्निकर्षजन्यत्वादिति चेन्न।
ज्ञाने विषयरूपस्यांशस्येन्द्रियतद्दोषाजन्यत्वात् अप्रमांशे तदर्थस्यासत्त्वेन सन्निकर्षाभावात् साक्षात्कारित्वं न स्यात्।
दोषस्य तद्धेतुत्वेऽतिप्रसंगो ननुगमश्च। प्रमायां समं प्रमस्ते च यायाध्ये प्रयोजकमस्ति अप्रमायां दोषवदिति चेन्न।
न। दोषाभावस्य सत्त्वादिति। उच्यते। प्रमामात्रे च नानुगतो गुणः किंतु तत्तत्प्रमायां प्रयोजकयवयवेन्द्रियसन्निकर्षे यथार्थलि
गसादृश्यवाक्यार्थज्ञानानां यथायथं प्रत्येकमेव गुणत्वं। अन्वयव्यतिरेकात्। तत्तदप्रमायां पित्तादिलिंगाभासादीनां दो
षत्ववत् प्रत्यक्षे विशेषदर्शनमपि गुणः तदनुविधानात्॥ ननु विशेषदर्शने हेतुरेव तद्धेतुरस्तु तद्व्यतिरेकादेव तदप्रमा
चेद्युतेः। अन्यथा तत्र विशेषदर्शनमेवकुतो न स्यात्। तत्रापि तदपेक्षायामनवस्थेति। तेन्न। एवं हि व्याप्यविषयकव्याप
कस्य पक्षे निश्चयमेनुमिताविव पुरुषप्रत्यक्षे प्रामाण्यसंशयो न स्यात्। करादिमति पुरुषत्वानत्वस्यानुव्यवसायेन निश्च
यात्। तत्रापि कथं विशेषदर्शनं विना कथं व्यापकप्रसक्तमिति चेत्। न। संशयविपर्ययोत्तरप्रमायां तस्याहेतुत्वात्॥

।।हेरंबः
।।१५।।

ममापि तद्धेतुत्वे सैव हेतुरिति चेत् न। नाकरचरणचिबुकादीनां प्रत्येकं विशेषत्वेन तद्धेतूनामननुगततया तादृशस्य प्रत्यक्षे
अहेतुत्वात्। तद्दर्शनेषु च व्याप्यदर्शनत्वमनुगतमस्ति। नन्वेवं संशयोत्तरं व्याप्यज्ञाने सत्यनुमितिः स्यान्न प्रत्यक्षमनुमि
तिसामग्र्या बलवत्त्वादिति चेत् न। अन्यत्र तथात्वेऽपि यत्र प्रत्यक्षसामग्र्या बलवत्वात् तत्र पुरुषं प्रत्यामीत्यनुव्यवसाया
त्। अत एव विशेषदर्शनजन्यत्वेन ज्ञानं बाधकं। तददर्शनजन्यं बाध्यं। अन्यथा बाध्यबाधकव्यवस्था न स्यात्। न च
प्रमाबाधिका। करस्य भ्रमजन्यपुरुषज्ञानस्यापि स्मरणज्ञानबाधत्वात्। नापि विपरीतबाध्यत्वेन बाधकं। बाध्ये तुल्यत्वात्।
अनन्यथासिद्धबाधकमिति चेत् तन्न। विशेषदर्शनजन्यस्यैव तदर्थत्वात्। न चैवं तः शाखवत्त्वेऽविशेषदर्शने पि
स्य प्रमाणेनितनत्वहेतुः। यदि विशेषदर्शनेऽप्रमाविरोधितद्भावः प्रमाहेतुः प्रत्यक्षस्यैव प्रत्यक्षदर्शने विरोधिदिगोह
गोरहमिति भ्रम एव तेषामदर्शनात्। तत्र दोषात्तत्र न स्ति। अपि च लिंगसादृश्यवाक्यार्थभ्रमदोषाभावप्रमाशान्तानुमित्या
दिदृतिसत्ययामशाद्गुणसिद्धिः। एवं च प्रमायां गुणजन्यत्वेनैव दोषप्रमाववाक्यार्थज्ञानगुणजन्यत्वेन तदाश्रयेच्छ्र
सिद्धिः। ननु प्रत्यक्षादावस्तु गुणजन्यत्वं वेदे तु प्रमाया प्रमानेतु पृथक्प्रमाहेतुः लाघवात् प्रमाधर्माभावएव प्रमात्वस्त
रिति चेन्न। तत्र लाघवाद्वाक्यार्थयथार्थज्ञानस्य हेतुत्वेन प्रमाधर्माभावानामन्यथासिद्धत्वात्। आप्तस्य प्रमाधर्मा
चमात्रेण वाक्यार्थज्ञानं विना तादृशवाक्याभावाच्च। अन्यथा तत्रापि तत्र च रूपज्ञानानुमानं न स्यात्। तस्याहेतुत्वात्।
असत्त्वे भ्रमयमपि हेतुः विनिगमकाभावात्। तथापि वेदे गुणसिद्धिः। न च नित्यनिर्दोषत्वात् दृष्टादेव वेदे प्रामाण्य
उपपत्तौ नापरिदृष्टनिसिद्धानादि सर्वत्र तत्त्वं नागोरवादिति वाच्यं प्रमाणवतः फलमुखगौरवस्यग्रादाविवादे।

॥ चिं०म० घासत्वात् । पूर्वकारणताग्रहसमये फलानुपस्थितेर्योगैरवाज्ञानात् । लोके नियतत्वाभावाच्च । अथ वेदे कर्तृस्मरणाद्बौ
॥१६॥ द्धाद्येलोकेपि निर्दोषत्वेनैव प्रामाण्यं वेदे च नित्यत्वेनैव वक्तुरभावे निर्दोषत्वमवधार्यत इति चेत् । न । बाधकस्य बहुशो
निराकरिष्यमाणत्वादिति स्यात् प्रतारकवाक्ये चयत्नीतिवक्तृपटोस्तीति दोषजन्यवाक्ये च संवादप्रामाण्यत
दर्शनाच्च । किं चैवं वेदवच्चासंपन्नं चैत्यवंदनं सादिगुरुबालादिवाक्यं प्रमाणं स्यात् । वक्तृदोषाभावात् । न च गुण
जन्यत्वाद्वक्तृतात्पर्यविषयत्वाच्च तत्प्रमाणं संवादेन साध्यं बाधात् । एतेन प्रतारकवाक्ये योग्यतैव नास्ति
वक्तृज्ञानविषयार्थाबाधो हि योग्यता स च नविषयश्च बाधित इति तन्न । घटवति घटो नास्तीति भ्रमविषयतया
भ्रमस्याहेतुत्वात् । किंच वाक्यार्थाबाधो योग्यता । लाघवात् । वाक्यार्थश्च तत्राबाधितः रूपेण । न च गुरुबालादि
वाक्यादन्वयबोध एव न भवति किंतु तेमवेयवदृतीस्त्वं प्रकाराप्रतीतिरिति वाच्यं । आकांक्षादेरन्वयबोधसामग्र्याः
सत्वे नैसर्गिकापलापात् । संवादादिना यथार्थत्वानुभवाच्च । एवं धूमभ्रमात् वह्निमत्येव वह्न्यनुमितिर्न प्रमा स्यात् ।
यथार्थलिंगज्ञानाजन्यत्वात् । न च वह्न्यंतरमेव तत्र विषयः प्रत्यभिज्ञानात् गोबादौ वेवपासिके तदभावाच्च । नापि
तदन्यतादात्म्यारोपः संसर्गारोपात् लिंगाद्यनारोपे मतेपि साध्यारोपप्रमात्वादिति । उच्यते । तत्र प्रतारकवाक्ये
शुकादिवाक्ये च प्रमाणशब्दत्वेनासिद्धत्वात् वेदवदीश्वरस्यैव यथार्थवाक्यार्थज्ञानजनकं तस्य कार्यमात्र ॥ हेरंब ॥
कर्तृत्वात् । शुकादिवाक्यस्य वेदतुल्यतादोषाभाववादिनापि वाच्यत्वात् । न चैवं शाब्दाभासोच्छेदस्तस्य [illegible] च ॥१६॥

रकर्तृकत्वादिति वाच्यं । तद्वाक्यार्थस्य सत्वेन भगवज्ज्ञानस्यागोचरत्वात् । एवं लिंगाभासजन्यप्रमायामपि वह्निव्याप्य
यत्वज्ञानमीश्वरस्यैव जनकमिति संप्रदायमतं । वयं तु ब्रूमः । शाब्दप्रमायां लोके वक्तुर्यथार्थवाक्यार्थज्ञानं न गुणः ।
किंतु योग्यतादिकं यथार्थं तज्ज्ञानं वा लाघवादावश्यकत्वाच्च । भ्रमप्रमादविप्रलिप्साजन्ये वाक्ये विसंवादिनिय
थार्थयोग्यतादिज्ञानं नास्ति वाक्यार्थस्य बाधितत्वात् । एवं करणापाटवादिभिन्नवक्तव्ये अन्याभिधाने विसंवादिनि
संवादितु प्रमाणमेव । योग्यताज्ञानमेव च परं विन्नास्ति । नन्वेवं नानार्थादन्यपरतात्पर्यकभ्रमे तत्क्लिन्नैव वा यथार्थयोग्यताज्ञा
ने सति संवादपरशाब्दज्ञानमपि प्रमा न तत्रापि तद्वाक्यं प्रमाणं स्यादिति चेत् न इष्टत्वात् । तात्पर्यविषये तु न तद्वाक्यं न तदा प्रमा
जनकमिति न प्रमाणं । एवं वेदेपि यथार्थयोग्यताज्ञानं गुण इति न वैदिकप्रमायां गुणजन्यत्वेनेश्वरसिद्धिः स्यादिति तन्न ॥
शाब्दे वक्तुर्यथार्थवाक्यार्थज्ञानमपि गुणः लोके प्रमाणशब्दप्रतिताहशास्यज्ञानस्य हेतुत्वात् । अत एव तेवलोक्तेन कृता
नानुमानं । एवं च वेदवाक्यार्थगोचरयथार्थज्ञानवत्स्वतंत्रपुरुषप्रणीतः प्रमाणशब्दत्वात् । आगमानपेतवाक्यवदितीश्व
रसिद्धिः । मैवं । प्रमाणशब्दत्वं हि वाक्यार्थयथार्थज्ञानपूर्वकतां विनापि संभवति आवश्यकयोग्यतादिसत्वात् । यथा
र्थतज्ज्ञानाद्वेत्युपपादितम् । अतो प्रयोजकमेतत् । तथापि लोके वाक्यार्थज्ञानं प्रमाणवाक्ये कारणत्वेन गृहीतमिति तेनाविना
कथं तदिति चेन्न । परस्यार्थं हि प्रयोज्यस्य वाक्यार्थज्ञानमुद्दिश्य तादृशपदस्य वाक्यार्थं ज्ञास्यतीति बुध्या वाक्य
प्रयोगः स चान्यथासिद्धः प्रथमवक्तुर्वाक्यार्थज्ञानेनादृशपदाकाङ्क्षाप्रयोगस्तस्य हेतुत्वे । नादृशपदस्मारकस्य प्रत्येकपद

॥ निं० म०॥ हेतोरेव शुकादिवदुपपत्तेः। अथ तात्पर्यविषये वेदः प्रमाणं तात्पर्यग्रहतत्प्रतीतौ च योच्चितितत्वं न त्वास्मदादेर्वेदं विना अतीन्द्रिया
॥१९॥ र्थदर्शित्वं येन न तत्प्रतीतौ च योग्यं कारणं स्यादेव। न च वेदादेव तत्। अन्योन्याश्रयात्। अतः सकलवेदार्थदर्शिनाप्यस्य वेदस्य पद
र्थप्रतीतौ च योग्यकारणं कृतं सत् प्रमाणमिति तादृशो हि वक्तुर्गुणस्तज्जन्या वेदार्थप्रमेति तदाश्रयस्तत्पुरुषधौरेयसिद्धिरि
ति चेत्। मैवम्। मीमांसादिसकलागमविद्याहृदार्थज्ञानवता व्यापकेन तत्तदर्थप्रतीतौ च योग्यस्य कारणमिति वेदार्थ
यथार्थविदस्तत्तदर्थतात्पर्यमस्त्येव। एवं पूर्वपूर्ववेतादृशाव्यापकेन तत्तदर्थप्रतीतौ च योग्यवितततात्पर्यत्वमवगम्य उत्त
रोत्तरेषां वेदार्थप्रत्ययो इति अनादिस्तात्पर्यपरंपरेति किमीश्वरेण। तर्हि वेदार्थो न भिन्नो व्यापकेनोच्चरितवेदस्य न
तदर्थप्रतीतौ च योग्य इति तत्त्वमिति तात्पर्याभावात् अप्रमाणं न वा तत्तेर्थप्रत्यय इति चेत्। न। अनादौ संसारे तस्य वेदस्य क्वचिद्विवे
न किञ्चिन्मीमांसाधीनवेदार्थज्ञानवता तत्प्रतीतौ च योग्यकारणं कृतं तावतैव तत्परत्वमिति। प्राभाकरास्तु। प्रामाण्यं स्वत
उत्पद्यते ज्ञायते चेति। तथा हि। निष्कम्पप्रवृत्त्यंगस्य स्यानुभवसाधारणयथार्थत्वमेव प्रामाण्यं। न च ज्ञानसामग्रीमात्रा
जन्यं। न तु गुणदोषाभाववादप्रेक्षस्तस्य सर्वज्ञानानां यथार्थत्वेन व्यभिचाराभावात्। अयथार्थत्वव्यवहारः तस्यैव बाधात्।
ज्ञाने तु न दोषजन्ये। बाधकत्वाभिमतज्ञानं तु भ्रमत्वात्। ज्ञानत्वाद्यथार्थत्वव्यपदेशो विपरीतव्यवहारजनने नौपाधिकः। अथ
यथार्थत्वस्य प्रामाण्यपरजतज्ञाने शुक्तौ रूप्यमप्रमाणं अप्रामाण्यं च कथं परत उत्पद्यत इति चेत्। न। अयथार्थत्वेनाप्रामा
ण्यं। सर्वधियां यथार्थत्वात्। किंतु विपरीतव्यवहारप्रवर्तकत्वं। तच्च ज्ञानसामग्र्यामधिकदोषप्रवेशाद्दोषहेतुकासं

MEMORIAL

सर्गाग्रहाद्वा उत्पन्ने ज्ञाने दोषसहकाराद्धर्मधर्मिणोरसंसर्गाग्रहे रूप्यमेकत्वासंसर्गाग्रहसहितं परत उत्पद्यते न
तु ज्ञानसामग्रीतः प्रमायामतिप्रसंगात्। उत्पाद्यते च विपरीतव्यवहारजनकत्वं बाधकात्। तस्य तेन तदनुत्पत्तिसाये
नेवाग्रहीतुमशक्यत्वादिति। ज्ञानस्वरूपेण न दोषतदभावौ हेतू व्यभिचारात्। ज्ञानानामयथार्थत्वेपि यथार्थत्वं
ज्ञानसामग्रीमात्रजन्यमेव। न तु गुणादोषाभावाद्। विपर्ययदशेपि धर्म्यंशे यथार्थत्वात्। असदर्थविषयतादि
षात्। इन्द्रियाणामसन्निहितअसदर्थे सामर्थ्याभावात्। न तु दोषमात्रं न कारणं किंतु तदपेक्षा ज्ञानसामग्रीति
अ यथार्थत्वे दोषाभावसापेक्षा साहेतुरिति चेत्। सैव सामग्री सदर्थे ज्ञाने दोषसापेक्षेति न तदज्ञानमयथार्थसदर्थे
ज्ञाने दोषनिरपेक्षेति तदज्ञानं यथार्थं न तु सैव तत्रैव ज्ञाने दोषतदभावसापेक्षा विरोधात्। यथार्थत्वे दोषतदभावो ना
नरीयकौ। यथार्थत्वं च ज्ञाने हि विवक्षितप्रकारवत्त्वमर्थस्य यद्धर्मवत्त्वमर्थस्य तत्प्रकारकज्ञानत्वं वा इदं रजतमिति ज्ञा
नमर्थस्य रजतत्वं स्वस्य रजतत्वाश्रयविषयकत्वं च यथार्थत्वरूपं प्रामाण्यं स्वप्रकाशत्वेन स्वयमेव परिच्छिन्नं स्वार्थे
श्चयरूपं तदतिरिक्तेन प्रामाण्यमानाभावात्। अस्तु वा तदपि यज्ज्ञातं स्वतः परतो वा मास्त्वपि किं तन्निरूपणेन
प्रवृत्तावनुपयोगात्। अर्थे हि निश्चयात् प्रवर्तत इति आवश्यकार्थनिश्चयादेव प्रवृत्त्युपपत्तेः। यथार्थ्यनिश्चयादे
व प्रवृत्तिरिति सर्वाकित्वं रूप्योपमर्थ इति निश्चयो ज्ञानप्रामाण्यनिश्चयाधीन इति चेत्। न। सर्वं हि ज्ञानं रजतरूपो
यमर्थ इत्याद्याकारं स्वार्थनिश्चयरूपमेवोत्पद्यते न तु परापेक्षा। अत एवार्थतथात्वं स्वयमेव निश्चीयत इति स्व

॥चिं०मू०। ॥१८॥

नः प्रामाण्यग्रहः यद्येतज्ज्ञानं न स्वार्थनिश्चयरूपं तदा न प्रामाण्यज्ञानमपि प्रामाण्यनिश्चयरूपं न वा तदधीनं ज्ञानान्तर
मपि स्वार्थनिश्चयरूपमिति व्यर्थमर्थनिश्चयार्थं प्रामाण्यनिरूपणं । प्रामाण्यज्ञानेपि तद्विषयनिश्चयार्थमन्यापेक्षा
यामनवस्था । किं च परतःपक्षे गृहीतप्रामाण्यस्य परप्रामाण्यनिश्चायकत्वेनवस्था अतो यथा ज्ञानान्तरमगृहीत
प्रामाण्यमेव परप्रामाण्यनिश्चयरूपं यदा तु न प्रामाण्ये जिज्ञासा तदा तस्यापि प्रामाण्यमगृहीतप्रामाण्येनैव प
रेण निश्चीयत इति नानवस्था । यथार्थज्ञानमपि अनिश्चितप्रामाण्यमेवार्थनिश्चयरूपं अविशेषात् । न ह्युत्पन्ने
ज्ञानेर्थनिश्चयः संशयः किमेवमनेवं वेति । अथ ज्ञानमर्थनिश्चयरूपमपि स्वमगृहीत्वा स्वप्रामाण्यं गृह्णीया
दिति चेत् तर्हि स्वग्राहकत्वेपि विवादेर्थस्य तथाभावरूपं प्रामाण्यं स्वयमेव गृह्यत इति न वाप्यनुमतं । अथ स्वतः
प्रामाण्यग्रहे अनभ्यासदशोत्पन्नज्ञाने इदं प्रमाणं न वेति संशयो न स्यात् । निश्चिते तदभावात् । अत एवाप्रमात्व
शंकयार्थेपि किमेवमनेवं वेति संशयान्न ज्ञानमात्रात्करतलामलकज्ञानादावप्यर्थनिश्चयो व्यभिचारादिति चेत् ।
मैवं । न ह्यज्ञाने सत्यत्वासत्यत्वसंशयः सर्वज्ञानानभ्यस्तत्वात् किं तु गृहीते तस्मिंस्तद्विषयकं ज्ञानद्वयमेकं वा ज्ञानमि
त्याकारे ज्ञाने प्रमाणं न वेति संशयस्य सत्त्वकारणदोषसंशयात् स च ज्ञानान्तरान्निवर्तते । नन्वनुमितित्वं प्रमात्वे
तच्च स्मृत्यन्यत्वं । स्मृतित्वं च संस्कारासाधारणकारणकत्वमिति न स्वतो गृह्यते संस्कारादेरग्रहात् । अत एव न स्व ॥हेरंब
तउत्पद्यते स्मृतिसाधारणत्वादिति चेत् न । प्रवृत्त्यौपयिके हि प्रामाण्यमर्थतथात्वनिश्चयत्वं तच्च स्वत एव गृह्यते ॥१८॥

अन्यूनानतिरिक्तस्वसमानविषयकज्ञानान्तरानपेक्षत्वे:

उत्पद्यते च । ननुन्वेमतित्वसहितं गौरवात् । तथापि संवादादिना प्रवृत्तेः प्रामाण्यं यथार्थत्वमेवानुमीयते न त्वनुमितित्वे
सति स्मृतौ व्यभिचारात् । स्मृत्यनुभवयोः प्रमाप्रमाव्यवहारस्तान्त्रिकाणां सापेक्षत्वनिरपेक्षत्वनिबन्धनो यथार्थानुभ
वो मानमपेक्षतयेष्यत इति तैरभिधानादिति ॥ अत्र ब्रूमः । प्रामाण्यनिश्चयो निष्कम्पप्रवृत्तिहेतुर्न तत्संशय इत्यनुभव
सिद्धत्वदनुमतं च । तत्र प्रामाण्यं न त्वर्थतथात्वनिश्चयत्वं अनभ्यासदशोत्पन्नज्ञानस्य स्वप्रकाशेनानुव्यवसायेन वा
र्थतथात्वनिश्चयत्वग्रहेपि निष्कम्पप्रवृत्त्यभावात् । प्रामाण्यसंशयाच्च विषयायथार्थत्वनियमे । नार्थतथात्वनिश्चय
त्वस्य स्वरूपतो विषयतश्चागृहीतत्वे सिद्धज्ञानद्वयरूपत्वमसाधारणत्वात् । तस्मान्नयमसमानाकमादिदं रजतमिति
ज्ञानान्निष्कम्पप्रवृत्तिः किं तु तद्व्याप्तवाकारात् । अथवा प्रामाण्ये न संशयः तस्यार्थतथात्वनिश्चयरूपस्य निश्चयात्
किं त्वगृहीतभेदज्ञानद्वयं विशिष्टज्ञानं वेति संशयः स एव निष्कम्पप्रवृत्तिप्रतिबन्धकोपि । अतस्तस्य ज्ञानान्तरान्निवृत्तौ
निष्कम्पप्रवृत्तिरिति चेत् तर्हि यस्य संशयो व्यतिरेकनिश्चयश्च प्रवृत्तिबन्धकस्तन्निश्चयस्तद्धेतुरिति व्यापेक्षमव्या
वृतस्य विशिष्टज्ञानत्वस्य निश्चयः प्रवृत्तिहेतुः न त्वर्थस्य तथात्वतस्य तस्यासाधारण्यात् । तस्मिन्नसत्यपि प्रवृत्तेः
तत्संशयाभावसहितस्यार्थतथात्वनिश्चयस्य प्रवर्तकत्वेपि गौरवाच्च । किं च प्रवृत्तिहेतुज्ञाने विघटयत एव ज्ञानस्य
न प्रवृत्तिविघटकत्वं न चेह तथा । संशये सत्यपि तस्य सत्त्वात् । अपि च । विशिष्टज्ञानत्वमेव प्रामाण्यमव्यावृत्तत्वात् । न त्व
र्थतथात्वनिश्चयत्वमसाधारणत्वात् । लौकिकपरीक्षकाणां भ्रमव्यावृत्तप्रमाव्यवहारात् तदितिभ्रमेप्रमात्वस्य
पारिभाषिकत्वापत्तेः । तस्माद्भ्रमव्यावृत्तत्वान्निष्कम्पप्रवृत्तिहेतुत्वात्प्रामाण्यसंशयनिवर्तकत्वाच्च विशिष्टज्ञा

॥विं०म०॥ नत्वमेवप्रामाण्यं।नन्वस्तुतथातदेवस्वतोगृह्यतइतिचेत्न।अगृहीतासंसर्गधर्मधर्मिविषयकैकज्ञानत्वंभ्रमव्या
॥१९॥ वृत्तंविशिष्टज्ञानत्वंतत्स्वतोगृहीतुंनशक्यते।अगृहीतासंसर्गत्वादेःप्रागनुपस्थितेःसामग्रीविरहात्।स्वप्रकाशज्ञा
नाहिस्वमात्रसाक्षिणी।अन्यथाअनभ्यासदशापन्नेज्ञानेपितस्यस्वतोग्रहेप्रामाण्यसंशयोनस्यात्।अतएवनज्ञा
नसामग्रीतएवप्रामाण्यमुत्पद्यतेकिमस्यापितथात्वापत्तेः।नन्वस्तु।अविद्यमानभेदस्याग्रहःसचास्यतोभावःकथं घ
पितस्यज्ञानाभाव[illegible]स्यतदभावरूपतयास्वतःसिद्धत्वेनप्रामाण्यंस्वतस्त्वमुच्यते।विद्यमानभेदस्याग्रहःप्रामाण्यंस
चाग्रहःप्रागभावःअग्रेभेदस्यग्रहात्।भेदग्रहप्रसक्तौसनजायतेदोषादिस्तुतत्कालसंसर्गरूपस्यतत्वादिपालनस्य
दोषजन्यत्वेनाप्रामाण्यपरंतदुत्पद्यते।संवादिविसंवादिविविक्तव्यवहारोपिविद्यमानाविद्यमानभेदाग्रहलक्षण
हेतुकएव।व्यवहारोपयुक्तंतुप्रामाण्यंयथार्थत्वमेव।तच्चज्ञानसामग्रीमात्रग्राह्यकंप्रामाण्यंदोषात्।अनभ्यासदशा
पन्नेप्रामाण्यसंशयोपिविद्यमानाविद्यमानभेदाग्रहकोटिद्वयावलम्बीसन्नेवनिष्कम्पप्रवृत्तिप्रतिबंधकइति।तच्चा
निष्कम्पप्रवृत्तिहेतुर्हिप्रामाण्यग्रहणंतच्चन्न्यात्।निष्प्रयोजनत्वात्।तच्चयद्यविद्यमानभेदाग्रहरूपंतदानन्वस्वतोज्ञा
भेदास्तुशक्यतेअविद्यमानेग्रहस्यतत्प्रतियोगिनःसत्वात्।प्रागनुपस्थितेश्च।अनभ्यासदशायांज्ञानेज्ञानेपिअविद्य
मानभेदाग्रहेसंशयाच्च।एतेनोत्सर्गिकसंसर्गग्रहएवप्रामाण्यंसंसर्गाग्रहएवाप्रामाण्यमितिनिरस्तं।संसर्ग
ग्रहत्वस्यस्वेनगृहीतुमशक्यत्वात्।शक्यत्वेवाअनभ्यासदशायामपितद्ग्रहेतत्संशयोनस्यात्।तस्माद्भ्रम ॥हेरंबः॥
व्यावृत्तंनिष्कम्पप्रवृत्तिहेतुःप्रामाण्यमगृहीतासंसर्गधर्मधर्मिविषयकैकज्ञानत्वरूपविशिष्टज्ञानत्वंसंसर्गज्ञा ॥१९॥

नत्वंवाअविद्यमानभेदाग्रहत्वंवास्वतोज्ञातुंनशक्यते।किंतुविशेषदर्शनादिजन्यत्वेनावधार्यतइतिवक्ष्येपायितंपरतःप्रा
माण्यं।अथकिंतत्प्रामाण्यं।नतावज्जातिः।योग्यव्यक्तिवृत्तित्वेनप्रत्यक्षत्वेप्रमात्वसंशयानुपपत्तेः।प्रमात्वस्यानुभव
त्वाच्च।साक्षात्त्वादिनासंकरापत्तेश्च।वीजसाम्येनगुणेपितत्स्पदाशत्वात्।तारत्वादेरुत्कर्षरूपतयाजातित्वेनानन्य
गतिकतयाचनानात्वात्।प्रमात्वनानात्वेननुगमः।किंत्वेवमप्रमायामंशेप्रमात्वेनस्यात्जातेर्व्याप्यवृत्तित्वात्।नियमा
त्।नचेष्टापत्तिः।अंशेसंवादिनिविसंवादिनिचसमूहालम्बनेप्रमाप्रमात्वयोरनुभूयमानत्वेनैकदेशस्यकर्तुमशक्य
त्वात्।अथविपर्ययस्यांशेनप्रमात्वे।किंतुसमूलित्वयथार्थत्वमात्रत्वमितिचेत्।नहियथार्थानुभवत्वमेवप्रामाण्यमावश्य
कत्वात्।नचतदपीतिवक्ष्यते।अथयथार्थाभावःभावोवानाव्याप्यवृत्तिरितिनियमेतिरस्कृत्यावधितानुभवबलात्स
योगतदभावयोरव्याप्यवृत्तित्वंतन्नेव्याप्यवृत्तित्वयच्चव्याप्यवृत्तितन्नाव्याप्यवृत्तीतिव्याप्तेःप्रमात्वस्यनोभयरूपत्वमि
तिवाच्यं।संयोगात्यन्ताभावयोरपिव्यभिचारात्।नचतस्याभावद्वयमानाभावात्गुणदोषयोरेकत्रसत्वेअव्याप्यवृत्तित्वे
गुणमात्रसत्वेव्याप्यवृत्तित्वमित्यन्यथोपपत्तेश्च।अन्यथाप्रमात्वस्यापिघटत्वसत्ताभावसामानाधिकरण्यंनस्यात्।
सामान्यत्वात्।तस्मादंशेप्रमायरूपत्वमितितामेवं।अवच्छेदभेदंविनाविरुद्धयोरेकत्रासमावेशादप्रतीतेश्च।नचविष
यएवांशरूपःप्रमात्ववृत्तेरवच्छेदकस्तद्विषयत्वस्याप्रमायामपिसत्वात्।ननुविशेष्यावृत्तिप्रकारकत्वंतद्वतितत्प्रकारकत्वं
प्रमात्वतदभावौवाच्यौतावच्छेदकमस्तीतिचेत्।तर्हितयोरेवप्रमात्वाप्रमात्वव्यवहारजनकत्वमस्तुआवश्यकत्वा
९४ त्वंतथाजातिर्व्याप्यवृत्तिरेवेतिव्याप्तिमपित्यानुभवबलादेवप्रमात्वतदभावयोरव्याप्यवृत्तित्वमस्तु।नचयदव्याप्यवृत्तिति

॥वि॰म॰ स्मृथमोपस्थितत्वाच्च किं ज्ञात्या। न च तदपीति वक्ष्यते। नापि यथार्थाग्रहीतग्राहित्वं लोकसिद्धप्रमात्वधमापह्नवस्मृ
॥२०॥ व्याप्तेः। न च प्रत्यक्षस्य वर्तमानार्थग्राहित्वेन स्वाश्रयक्षणविशिष्टस्वसादिग्राहकत्वादगृहीतग्राहित्वमन्यथैकसम
येऽज्ञानयोगपद्यप्रसंग इति वाच्यं। क्षणानामतीन्द्रियत्वात् स्थूलोपाधिमादाय वर्तमानत्वग्रहात् स्वरूपसतः क्रमि
कक्षणोत्पत्तिकत्वेन ज्ञानायोगपद्यात्। न च स्तंभादिषु प्रतिक्षणं गुणकर्माद्युत्पत्तिरस्ति येन तदायागृहीतग्रा
हित्वं स्यात्। वेदादौ क्रमोत्पन्नवेदार्थगोचरधारावाहिकबुद्धावव्याप्तेश्च। नापि यथार्थानुभवत्वं। ज्ञाने घटत्वादिनाय
थार्थसादृश्याभावात्। सादृश्यमात्रस्य भ्रमेऽपि गतत्वात्। न च गुणजन्यानुभवत्वं दोषाभावजन्यानुभवत्वं वा
तयोरननुगतत्वात् प्रमानिरूप्यत्वाच्च। नाप्यबाधितानुभवत्वं बाधस्य विपरीतप्रमात्वात्। नापि संवाद्यनुभवत्वं
ज्ञानान्तरेण तथोल्लिख्यमानत्वस्य संवादित्वस्य भ्रमसाधारणत्वात्। नापि समर्थप्रवृत्तिजनकानुभवत्वं उपेक्षा
प्रमायामव्याप्तेः। तद्योग्यतायाः प्रमानिरूप्यत्वात्। नापि तत्त्वानुभवत्वं तत्त्वस्य अज्ञानात्। भावत्वादिना भ्रमसाधा
रणत्वात्। नापि विशेष्यनिष्ठासत्ताभावाप्रतियोगिधर्मप्रकारकानुभवत्वं संयोगादिप्रमायामव्याप्तेः। अभावव्या
प्यवृत्तित्वे विशेषणे संयोगतद्भ्रमेऽतिव्याप्तेः। तदसत्ताभावस्यैकत्वात्। नापि विशेष्यवृत्त्यन्योन्याभावप्रतियोगि
तावच्छेदकधर्माप्रकारकानुभवत्वं अव्याप्यवृत्तिप्रमानुपग्रहात्। मूले वृक्षः कपिसंयोगवान्नाग्रे इत्याबाधि ॥हेरंब॥
तानुभवात् संयोगवदन्योन्याभावस्याप्यव्याप्यवृत्तित्वात्। भेदाभेद एवं स्यादिति चेत्। अनुभवमुपलभस्व ॥२०॥

यद्वा तदवच्छेदभेदेनासत्ताभाववदन्योन्याभावस्याप्यव्याप्यवृत्तित्वमुपेयं। अत एव पक्के ह्रदे इदानीं न स्यामह
ति धीः समयभेदादविरुद्धा तत्रैव तदन्योन्याभावमालंबते। नापि विशेष्यावृत्त्यप्रकारकानुभवत्वं। एकैकविशे
ष्यावृत्तिनानाप्रकारकसमूहालंबनेऽव्याप्तेः। न च प्रकारस्यैकविशेष्यवृत्तितया न विशेष्यावृत्तित्वमिति वाच्यं।
भ्रमाभ्रमरूपसमूहालंबनेऽतिव्याप्तेः। न च यावद्विशेष्यावृत्तित्वं विवक्षितं। एकैकविशेष्यवृत्तेर्यावद्विशे
ष्यावृत्तित्वेन समूहालंबनाव्याप्तेः। एकविशेष्यके यावदर्थाभावाच्च। अर्थविषयताश्रयो विशेष्यः ज्ञानत
त्प्रतियोगि भ्रमेष्वत्युक्तेर्निर्विषयताव्यधिकरणेन रजतत्वेनावच्छिन्नतरजतवृत्तित्वसमानाधिकरणेन रजत
त्वेन। विषयतात्वविनिर्मयेताना हि नाज्ञाततद्रूपाविवक्षिता। अप्रसिद्धा तादृसिद्धेरतः। तानुगतप्रमापातदप्रवृत्तेश्च।
किं तु ज्ञानस्य विषये विशेषणत्वाविशेषः कश्चित्। परज्ञानज्ञानत्वेन घटं घटत्वेन जानन्नेव घटमयं जानातीति न
वेति संशयाद्विषयता न स्वरूपातिरिक्तस्य स्वाश्रयस्वःभावादिविशेषणताविलक्षणस्य विषयज्ञानविशेषण
ताविशेषस्यावश्यं स्वीकारात्। अन्यथा घटत्वेन ज्ञातोऽयमर्थ इति तत्तोऽयार्थासंभवात्। प्रकृमत्वमपि विषयस्य ज्ञा
नेऽविशेषणताविशेष एव न तु विषयत्वमतिप्रसंगात्। एवं च विषयतासमानाधिकरणोऽप्रेरकोऽनुभ[illegible] प्रकार
समानाधिकरणविषयताप्रतियोग्यनुभवो वा। स्वसमानाधिकरणधर्मप्रकारकविषयताप्रतियोग्यनुभवो
वा स्वसमानाधिकरणधर्मावच्छिन्नविषयताप्रतियोग्यनुभवो वा प्रमेति चेत्। न निर्विकल्पकाव्याप्तेः। विषयता

।।चि॰प्र॰ समानाधिकरणेदंत्वप्रकारकभ्रमस्यापि प्रमात्वप्रसंगात् भ्रमस्तत्रांशे प्रमेति चेन्न तर्ह्यनुभवत्वमेव प्रमात्वं व्यर्थमधि
।।२१।। कं। अनुभव एव क्वचिदंशे भ्रमः प्रमा नेति चेन्न। उक्तलक्षणेन तादृग्ज्ञानत्वात्। अथ स्वव्यधिकरणधर्मानवच्छिन्न
विषयताप्रतियोग्यनुभवः प्रमा। समूहालंबने च प्रतिविशेष्यं विषयताभेदादेकवृत्तिविषयता नापरवृत्तिना प्रकारेण
वच्छिद्यत इति अतो नाव्याप्तिरिति चेन्न। भ्रमांशप्रमायामव्याप्तेः। नहि या विषयता व्यधिकरणेनावच्छिन्ना सा तद
नवच्छिन्ना विरोधात्। नापि प्रकारव्यधिकरणविषयताप्रतियोग्यनुभवः प्रमा। प्रकारव्यधिकरणविषयताप्र
तियोगिनि तत्प्रतियोगित्वस्याभावेन भ्रमांशप्रमाव्याप्तेः। नापि स्वव्यधिकरणधर्मानवच्छिन्नविषयताप्रति
योग्यनुभवः स्वाधिकरणावृत्तिप्रकारकविषयताप्रतियोग्यनुभवो वा प्रमा। तत एव भ्रमे [illegible] विषयतायाः स्वव्यधि
करणधर्मावच्छिन्नत्वात् स्वाधिकरणावृत्तिप्रकारकत्वाच्च। नापि स्वसमानाधिकरणान्योन्याभावप्रतियोगितावा
च्छेदकधर्मानवच्छिन्नविषयताप्रतियोग्यनुभवः प्रमा। भ्रमांशप्रमायामव्याप्तेः। अन्योन्याभावस्याव्याप्यवृत्तित्वे अ
न्नाव्याप्यवृत्तिप्रमायामव्याप्तेश्च॥ यत्तु प्रमात्वाप्रमात्वयोर्विरोध एवेति भ्रमो न प्रमेति। तत्तुच्छं। उभयाभेदमादायोभ
स्यानुभवात्। अन्यथा भ्रमस्यानुभवबहिर्भावापत्तेः। एतेन व्यधिकरणप्रकारकं ज्ञानं भ्रमः तदन्योऽनुभवः प्रमा। भ्रमो ध
धर्म्यंशेऽपि न प्रमा निरस्तं। नापि प्रकाराधिकरणावृत्त्यप्रकारकविषयताप्रतियोग्यनुभवः प्रमा प्रकारानधिकरणवृत्ति ।।हेरंब।।
विषयत्वाप्रतियोग्यनुभवो वा प्रमा। प्रमेयमिदमिति ज्ञाने प्रकारानधिकरणस्याप्रसिद्धेः। किंच रजतत्वप्रकारकवि ।।२१।।

इंद्रियार्थसंनिकर्षोत्पन्नं ज्ञानमव्यभिचारि अव्यपदेश्यं व्यवसायात्मकं प्रत्यक्षं

षयतायां रजतवृत्तित्वनियमादितरत्वावच्छिन्नैव रजतत्वभ्रमे रजतवृत्तिर्विषयता अतो रजतभ्रमोऽपि रजते प्रमा स्यात्। अथ
रजतपुरोवर्तिनोरेकैव विषयता सा च प्रकारानधिकरणवृत्तिधर्मावच्छिन्नैवेति चेन्न। तर्हि धर्म्यंशेऽपि तज्ज्ञाने प्रमाणं स्या
त् व्यधिकरणप्रकारकत्वस्य तुल्यत्वात्। धर्म्यंशानुप्रमात्वे रजतत्वांशेऽपि प्रमा स्यात्। अथ रजतांशे धर्म्यंशे च तज्ज्ञा
नं प्रमैव वैशिष्ट्यांशे न प्रमेति चेन्न। वैशिष्ट्यस्य पूर्वज्ञानाविषयत्वेनाप्रकारत्वात्। वैशिष्ट्यवृत्तिविषयतायां र
जतत्वपुरोवर्तिनोः प्रकारत्वेन भ्रमस्य वैशिष्ट्यांशे प्रमा चाप्रमात्वापातनात्। नापि स्वव्यधिकरणप्रकारा
नवच्छिन्नविषयताप्रतियोग्यनुभवः प्रमा। प्रमेयमिति ज्ञाने प्रमेयत्वप्रकारकविषयतानाश्रयस्याप्रसिध्या
अव्याप्तेः। न च संयोगित्वादिना रूपेण प्रमेयत्वप्रकारकविषयताव्यतिरेको घटादौ प्रसिद्ध इति वाच्यम्। प्रति
योगितावच्छेदकत्वेन प्रतियोगिज्ञानस्याभावधीहेतुत्वात्। किंच यत्किंचिद्व्यधिकरणप्रकारानवच्छिन्नत्व
भ्रमसाधारणं सकलतज्ज्ञानव्यधिकरणप्रकारानवच्छिन्नत्वं निर्विकल्पकाव्यापकं तस्य निष्प्रकारकत्वादिति।
उच्यते। यत्र यदस्ति तत्र तस्यानुभवः प्रमा। तद्वति तत्प्रकारकानुभवो वा। यत्र यन्नास्ति तत्र तस्य ज्ञानं तदभा
ववति तत्प्रकारकं वा ज्ञानमप्रमा। तदन्यत्वे सत्यनुभवत्वमेव वा प्रमात्वम्। तत्प्रकारकत्वं तद्वैशिष्ट्यविष
यकत्वं तद्विशेषणताज्ञानजन्यत्वं वा। ईश्वरस्य तद्वैशिष्ट्यविषयकं ज्ञानं न तु तत्प्रकारकं निर्विकल्पकं च
प्रमाप्रमाबहिर्भूतमेव व्यवहारानंगत्वात्। अव्यपदेश्यपदेन तदुपग्रहस्य नामजात्यादियोजना।

॥चिं०मू०॥ रहितमपिप्रत्यक्षमस्तीयत्वतात्पर्यं।इदंरजतमितिज्ञानमिदंत्ववतितदनुभवत्वात्प्रमा।रजतत्वाभाववतितत्प्र
॥२२॥ कारकज्ञानत्वादप्रमांशोसमूहालंबनेचनाप्रमाएकप्रकाराभाववतितदप्रतीतेः।नन्वेवमव्याप्यवृत्तिभावा
भावयोरेकत्रप्रमाप्रमात्वंस्यात्।तदभाववतितत्प्रकारज्ञानत्वादिति।चेत्।न।भिन्नभिन्नावच्छेदेनहिवृक्षे
संयोगतदभावौनवृक्षमात्रेविरोधादननुभवाच्च।तथाःवृक्षेग्रसंयोगोनतत्रतदभावः।यदवच्छेदेनयत्रयदस्ति
त्वियाविवक्षितंगोत्वादावपिसास्नाद्यवच्छेदेनवृत्तेः।पाकरक्तेश्यामोयमितिधीःप्रमैव।कदाचित्तत्रतत्त्वावगाहि
नीश्यामइतिधीरप्रमैव।नन्वेतल्लक्षणेननुगमः।नहिप्रमासर्वत्र।किंतुक्वचित्।तथाचकिंज्ञानंकुत्र
प्रमेतिप्रश्नेतत्तद्विशेष्यस्थलघट्यत्वेनयत्तज्ज्ञानमेवलक्षणमुक्तं।अन्येत्वनुभवत्वमेवप्रमात्वं।भ्रमेप्यंशमादाय
प्रमाव्यवहारात्।रजतादिरजतादिप्रमाप्रमात्वंविशेषणलक्षणीया।रजतत्ववतितदनुभवस्तदभाव
वतितदनुभवोवेत्यादिना।नन्वनुभवत्वस्याप्यप्रमासाधारण्येनतज्ज्ञानस्यानिष्कंपप्रवृत्त्यंगत्वमिति
सं०। चेत्।विशेषविषयप्रमायाएवप्रवर्तकत्वात्।अतिरिक्तविषयतापक्षेविषयताश्रयोयत्प्रकारकोनुभ
वःप्रमा।केवलान्वयिनिविषयताश्रयावृत्तिरवृत्तिरेवप्रसिद्धः।यद्वायत्प्रकारिकायाविषयतातत्प्रकारसमा
नाधिकरणविषयताकःस्वप्रकारसमानाधिकरणविषयताकोवानुभवःप्रमा।यत्प्रकारिकायाविषय ॥हेरंब॥
तातत्प्रकारकव्यधिकरणविषयताकःस्वप्रकारकव्यधिकरणविषयताकोवाज्ञानंभ्रमः॥ ॥२२॥

१२

प्रकारभेदेनैकत्रैवविषयताभेदइतिलक्षणद्वयस्यसमावेशात्प्रमात्वभ्रमसंकरः।यद्वाविशेष्यनिष्ठात्यंताभावाप्र
तियोगिप्रकारकविषयताप्रतियोगी।विशेष्यनिष्ठात्यंताभावप्रतियोगिप्रकारानवच्छिन्नविषयत्वप्रतियो
वाविषयतासमानाधिकरणात्यंताभावप्रतियोगिप्रकारकविषयत्वप्रतियोगीवाविषयतासमानाधिकरणा
त्यंताभावप्रतियोगिप्रकारानवच्छिन्नविषयताप्रतियोगीअनुभवःप्रमा।स्वसमानाधिकरणप्रकारकविष
यत्वाप्रतियोगिज्ञानंस्वसमानाधिकरणप्रकारावच्छिन्नविषयताप्रतियोगिज्ञानंवाभ्रमः।इदंरजतमितिभ्रमेवि
षयताद्वयेव्यधिकरणप्रकारावच्छिन्नत्वतत्सत्त्वेनत्वयाविषयत्वप्रतियोगित्वतदप्रतियोगित्वयोरविरोधात्
समूहालंबनेचविषयताभेदान्नप्रमालक्षणेऽव्याप्त्यतिव्याप्ती।वस्तुतस्तुविशेषणताविशेषेणास्वसमाना
भावात्।सामान्यतोज्ञानेज्ञातेतस्यकिंचिद्विशेषणेतिसामान्यतोविषयताज्ञानेघटमयंजानातीति।नचेति
संशयतादवस्थ्यात्।तस्माद्घटतज्ज्ञानयोःस्वपक्षेपितदीयत्वतद्विषयत्वेनगृहीतमिति।तद्विषयत्वेचेत्स
देहस्तदीयत्वेचसंबंधंविना।तत्संबंधवत्स्वभावत्वं।ननुतेप्रकाशस्यवस्तुतस्तदीयतामात्रनिबंधनःस्वभावविशे
षस्तद्विषयत्वमिति।संबंधंविनाकथंतदीयत्वसंबंधस्यैवस्वभावात्।यथातत्वेववविशेषणतायां।अन्यथानवस्था
नात्।अन्यत्रापिस्वरूपसंबंधएवगतिः।अन्यथासामान्येनाभावसमवाययोर्ज्ञानेऽधिकरणेवृत्ताततयोः
संशयोनस्यात्।अधिकरणानुभवस्यस्वरूपाणांज्ञानत्वात्।तत्राप्यभावसमवाययोर्विशेषणताविशेषेण

चिं॰म॰ गृहीतइतिचेत्।सामान्यतस्तद्ग्रहेपितत्संशयात्।यत्तुसमूहालंबनविशिष्टज्ञानयोर्विशेषानुभवाद्विशिष्ट
॥२३॥ ज्ञानेविशेषणताविशेषोविषयइति।तन्न।विशेषणतामादायसमूहालंबनेसत्त्वात्।तत्रापिविशेषणा
तरस्वीकारेनवस्थानात्।समूहालंबनात्तुविशिष्टज्ञानस्यविशेषःकारणभूतःकार्यभूतःप्रकारभूतो।प्रवो
कोऽपिविशेषणताविशेषःसचधर्मिण्येवास्तीतिचेत्।न।तमादायसमूहालंबनसत्त्वात्।ननुसर्वज्ञा
नानांयथार्थत्वात्भ्रमालक्षणस्यावसीप्रसिद्धिः।अन्यथाख्यातौमानाभावात्।तथाहिरजतार्थिप्रवृत्तिवि
षयत्वेरजतत्वप्रकारकानुभवविषयत्वव्याप्यंरजतार्थिप्रवृत्तिविषयमात्रवृत्तिधर्मत्वात्।रजतमात्रवृत्ति
धर्मवदित्यन्यथाख्यातिव्याप्त्यसिध्यतीसमाप्रकालत्वा।रजतमात्रवृत्तित्वेचोपाधिः।शुक्तिवृत्तिज्ञानविषयता
रजतत्वप्रकारिकारजतार्थिताजन्यप्रवृत्तिविषयवृत्तिविषयतावत्।रजतवृत्तिविषयतावदित्यत्ररजतवृत्तित्वंउपाधिः।
रजतत्वंचरजतवृत्तिज्ञानविषयतावच्छेदकं।अरजतविषयप्रवृत्तिहेतुज्ञानप्रकारत्वात्।शुक्तित्ववदित्यत्ररजत
वृत्तित्वंउपाधिः।रजतत्वप्रकारिकाज्ञानविषयताऽरजतवृत्तिः।अरजतनिष्ठासत्ताभावप्रतियोगिनीनभवतीतिवा।
अरजतविषयप्रवृत्तिहेतुज्ञानविषयतात्वात्।शुक्तिवृत्तिविषयतावदित्यत्ररजतावृत्तित्वमुपाधिः।~~रजतत्वप्रकारि~~
~~[illegible]~~विषयतायानिरस्तत्वाच्च।विवादपदंरजतज्ञानंशुक्तिविषयकंप्रवर्तकज्ञानत्वात्।शुक्तिज्ञानवदित्यत्र ॥हेरंब॥
ज्ञायमानेष्टभेदाग्रहेकारणतावच्छेदकंरजतज्ञानेनप्रवर्तकमित्यसिद्धिः।शुक्तिःरजतज्ञानविषयताश्रयः।रज ॥२३॥

तार्थिप्रवृत्तिविषयत्वात्रजतवदित्यत्ररजतत्वंरजतत्वमुपाधिः।शुक्तौरजतार्थिप्रवृत्तिःस्वधर्मिधर्मिकरजतत्वप्र
कारकज्ञानसाध्यारजतार्थिप्रवृत्तित्वात्।रजतेप्रवृत्तिवदित्यत्ररजतविषयत्वेउपाधिः।स्वपदार्थाननुगमश्चत
स्मिन्सागेरजतार्थिप्रवृत्तिधर्मिधर्मिकरजतत्वप्रकारकेणाप्रयसिद्धस्मरणेनार्थान्तर।उच्यते।रजतार्थिताजन्या
शुक्तौप्रवृत्तिःइष्टप्रवृत्तिविषयविशिष्टज्ञानसाध्याप्रवृत्तित्वात्।शुक्तौशुक्त्यर्थिप्रवृत्तिवत्।नचेष्टविषयप्रवृ
त्तित्वमुपाधिःसाधनविशेषित्वात्।यद्वारजतेच्छाजन्यशुक्तिनिष्ठप्रवृत्तिजनकंरजतत्वप्रकारकंज्ञानंशुक्ति
विषयकंशुक्तिनिष्ठप्रवृत्तिप्रयोजकज्ञानत्वात्।शुक्त्यर्थिशुक्तिप्रवृत्तिज्ञानवदितिअवच्छेदकत्वेपिप्रवृत्तिप्र
योजकत्वात्नासिद्धिः।हेतुत्वमपितस्यसाधयिष्यामः।तथापिचमिदंज्ञानंरजतत्वप्रकारकंरजतेच्छाजन्यप्र
वृत्तिहेतुज्ञानत्वात्।रजतेसत्यज्ञानवत्।नचग्रहणस्मरणयोर्विशिष्टज्ञानस्यवापक्षत्वेबाधः।आश्रयासिद्धि
र्वा।उभयासिद्धेःनशुक्तिनिष्ठप्रवृत्तिहेतुत्वेनपक्षत्वात्।अन्यथासाध्यतदभाववतःपक्षत्वेऽनुमानोच्छेदः॥
समवायातीन्द्रियत्ववादिनेत्रप्रत्यक्षगृहीतात्मसंसर्गेधर्मधर्मिविषयकमेकंज्ञानमेवविशिष्टज्ञानंसिध्यतीति।नन्वेवमुभ
यख्यातिर्नान्यथाख्यातिर्व्यधिकरणप्रकारक तत्वात्।नचविसंवादिप्रवृत्तिजनकत्वमुपाधिः।तथाविधेर
दज्ञानेरजतज्ञानेचत्वन्मतेसाध्यव्यापकत्वात्।नापिदोषाजन्यत्वेपरस्यज्ञानमात्रेतथात्वात्।अन्यथातयोरेवसा
ध्याव्यापकत्वात्।नचाप्रयोजकत्वं।इष्टपुरोवर्तिविशिष्टज्ञानस्यप्रवृत्तिहेतुत्वात्।अत्रप्राभाकराः।अप्रया

चिं० म०
॥२४॥

जरमिदं रजतमित्रोपस्थिते पुरोवर्तिन्यभेदाग्रहादेव प्रवृत्त्युपपत्तेः किं विशिष्टज्ञानेन परेणाप्यारोपनियमार्थं तदभ्युपगमात्।
न च रजतं प्रवृत्तिं प्रति विशिष्टज्ञानस्य हेतुत्वात् इहापि तत्सिद्धिः प्रवृत्तिमात्रेऽभेदाग्रहे सतीष्टपुरोवर्तिज्ञानस्य लाघ
वेन हेतुत्वात् न तु सदपि विशिष्टज्ञानं तत्र गौरवात्। न च रजते इष्टपुरोवर्तिभेदग्रह स्था प्रसिद्ध्या कथं तदभावव
तिवाच्यं पुरोवर्तिनि इष्टभेदे रजतप्रतियोगिकज्ञानविषयत्वाभावस्य पुरोवर्तिनीष्टभिन्नत्वप्रकारकज्ञानविषयत्वाभा
वस्य वा हेतुत्वात्। न चाभेदव्यवहारो व्यवहर्तव्यधासाध्यः न तु तदज्ञानाग्रहात् अन्यथा असंदाग्रहात् न भेदव्यवहाराप
पत्तिरिति वाच्यं। इच्छादीनां ज्ञानपुरोवर्तिविषयत्वात्। अभेदाभिलापो हि ज्ञानाभेदासंसर्गाग्रहादिति नाज्ञातव्यव
हारः ननु पीतः शंखो न श्वेत इति भेदग्रहेऽपि श्वेताभेदानुमित्या श्वेतार्थिप्रवृत्तेरभेदधीरत्र हेतुरिति चेत् न। न वा
पि पीतः शंखः स्वद्रव्यभेदज्ञानात्पीताद्यानप्रवर्तते भेदानुमितेरिति भेदाग्रह एव तत्र हेतुः स्यात् भ्रमत्वेन ज्ञाने भेद
ज्ञानमकिंचित्करमिति यदि तदा भ्रमत्वेन ज्ञाने भेदज्ञानमपि यथा नेदं श्वेतविषयकज्ञाने प्रवर्तकं न वाभेदानुमि
तौ विरुद्धे दोविषयः एतएव पूर्वभेदग्रस्यापि स प्रत्यानभेदग्राहीति दिक् आह प्रतीति विवादि प्रत्यय। नन्वेवं रजतेऽपि
विशिष्टज्ञानं न सिद्धमतप्रवृत्तेर्भेदाग्रहादेवोपपत्तेः इदं रजतत्वया ज्ञानामिरजतत्वया ज्ञातमिति अनुभवः ग्र
काव पितुल्यः न च शुक्तौ रजतत्वबोधोऽसौ अप्यसंसर्गाग्रह इति वाच्यं बाधस्यापि विशिष्टज्ञाने त्वेमानाभावादि ॥हेरंब॥
ति चेत्। तत्र हि रजतत्वस्य न स्मृतिः प्रागननुभवात्। ग्रहणं तेचेस्य धर्मिविषयत्वं योग्य धर्मिसंयोगे न रजतत्वा ॥२४॥

द्विज्ञातिग्रहादितिसिद्धं धर्मे धर्मिविषयकमेकं ज्ञानं। न च रजतत्वस्येश्शुक्त्यननुभवविषयत्वे हेतुरस्ति। न च प्रत्यभिज्ञा
न च संस्कारेन्द्रियेहेतू। तयोस्तु भिन्नविषयत्वात् एवं इदं रजतं इत्रोपस्थिते विरुद्धानेकभेदाग्रहे संशयः। ननु क्रमे
णोपस्थितानेकभेदाग्रहे संशये न स्यात् क्रमिकविपर्ययद्वयरूपः स्यात्। अन्यथा तत्वाप्यप्रतीतमात्। न च संशयानंतर
विपर्ययदर्शनायामुभयभेदाग्रहे संशयः एवं भेदग्रहेऽन्यथाख्यातिरिति वाच्यं दोषमहिम्नात्येकस्य न स्वातंत्र्येणो
पस्थितिः किं च भावे विशेषणतयेति तद्भेदाग्रहो अकिंचित्करः। ननु वह्निसंशयानंतरं धूमभ्रमादग्निकांचिद्दर्शार्थिप्रवृ
त्तिर्न तु तेन विना। न च तस्य स्वतंत्रेणोपस्थितवह्न्यसंसर्गाग्रहात् संशयानुरोधेन तस्य प्रागपि सत्वात् इदमनुमि
तिद्वारमिति वाच्यं। लिंगभ्रमस्यापि हि निर्वह्नित्वस्य स्वातंत्र्येणोपस्थितिप्रतिबंधेन नियमतः स्वतंत्रवह्निस्मृति
द्वारमिति न संशयान्यथाख्याती। न च पर्वतस्य प्रत्यक्षत्वे वह्नेः स्मरणे प्रत्यक्षत्वे भेदविशेष इति साक्षात्करोमी
ति स्यात्। न चेनुमिनुमीति वाच्यं। लिंगज्ञानानंतरं भाविल्यप्रतिसंधानाप्रतिसंधानेनोभयसंभवात्। एवं रज
तत्रोपस्थितानिष्टभेदाग्रहो निवर्तकः। तेनेदं रजतं न शुक्तिरित्यभावप्रतियोगित्वेनानिष्टोपस्थिते तद्भेदाग्रहो
न निवर्तकः शुक्त्यभावांश संसर्गाग्रहस्य नूकानकारस्यार्थं इति नान्यथाख्यातिः। अनिष्टाभेदग्रहस्य चे निवर्त
कत्वे रजतत्वं एव नेदं रजतमिति ¯ ¯ । ने निवर्तेत। अन्यथा अन्यथाख्यात्यापत्तेः। अत एव रजतं एव नेदं रजतमि
ति वज्ञानेऽपि न प्रवृत्त्यन्यथाख्याती। रजतभेदासंसर्गाग्रहात्। ननु रजतरंगयोरिमे रंगरजते इति अत्र प्रत्येकमुभ

॥ चिं०म०
॥२५॥

यभेदाग्रहे युगपत्प्रवृत्तिनिवृत्ती स्यातामिति चेत् न एवंविधे भ्रमे मानाभावात् । कार्योन्नेयधर्माणां यथाका
र्यमुन्नयनात् । क्रमोत्पन्नज्ञानयोर्भेदाग्रहादेकत्वाभिमानः । अन्यथा तवापि स्वतन्त्रोभयभेदाग्रहात्सत्येवं
रंगं रजतं वेति संशयः स्यात् । यदेवात्र विपर्यये नियामकं तत एव प्रवृत्तिनिवृत्ती स्यातां न तु हेतोरेवेति न्या
यात् । यत्तु प्रसक्तप्रतिषेधात्मा वा बाधो ऽन्यथातो न युज्यते । साधयत्यन्यथाख्यातिं बाध एव हि नः स्फुटमि
ति । तद्विपरीतं परस्परविरुद्धत्वाविशेषेण बाध्यत्वाव्यवस्थितेः विरुद्धार्थतयोत्पन्नत्वं च तुल्यं । पूर्वेणापि
क्वचित्परस्य बाधात् । तस्मादिदं दाग्रहात्प्रसंजितो व्यवहारो भेदज्ञानेन बाध्यत इति युक्तं । उपेक्षात्मेन च रा
व्यप्रयोगो बाध्यः तदा यतामात्रस्य भावत्वात्तद्विषयत्वस्य कथं रजतीयमात्रज्ञानं मरजतीयत्वभावव्याघा
तात् । न वा पर्यायसमूहालंबनापत्तेः । तदुक्तं । अन्यस्यान्यथा भानं प्रतीत्यैवापसहृतं ॥ परस्मिन्भासमाने
ऽन्यपरे भासते युक्तमिति विषयं विनैव तदाकारज्ञानमिति साकारवादः । ज्ञानायथार्थत्वे ज्ञानस्य तत्संशया
त्तेन निष्कंपप्रवृत्तिः स्यात् । न च दोषाजन्यत्वादिना विश्वासः भ्रमादिविश्वासेऽपि व्यभावापत्तेः । न पित ज्ञा
नात्र ज्ञानत्वेन तत्राप्यविश्वासादिति । तदुच्यते अनावतमभ्रानेष प्रमादो धीमतामपि । ज्ञानस्य व्यभि
चारित्वे विश्वासः किंनिबंधन इति । भ्रमस्य सन्मात्रविशेष्यत्वेनायथार्थता ऽसद्विषयत्वे ऽसत्ख्यातिः
न च तत्र तद्धेतुरपि शब्दस्याप्तोक्तस्य निर्दोषस्य लिंगस्य वा ऽहेतुत्वात् । न च शब्दानुमानाभासाभ्यां साध्यतोऽद

॥हेरंब॥
॥२५॥

सत्याशब्दस्य लिंगवत्तया पक्षस्य ज्ञानात् शाब्दानुमिती न चाभासे तज्ज्ञानमस्ति हेत्वभावादेव । किं त्वगृहीतासंसर्ग
ज्ञानद्वयं तत्र । इंद्रियस्य संबद्धार्थग्राहकत्वात् । न च प्रत्यभिज्ञा तावत् । उक्तोत्तरत्वात् । न च दोषवशादसंबद्धेपि वि
जातीयकार्ये दोषस्याजनकत्वात् । न हि भ्रष्टाद्यवबीजाद्यवांकुरः भस्मकोच्च न दोषः किंतु वह्नेरुद्भवः तस्य च दह
ने जनकत्वं दृष्टमेव । रसार्जनं त्वनुभवति भक्षणात् । दवदहनदग्धं च वेत्रबीजं नष्टमेव । तद्भस्मनः कदलीजनक
त्वात् । तदुक्तं साकारपातादसतोऽनुमानात् संवित्विरोधादर्थहेतुत्वभावात् धियामनाश्वासभयाच्च नेष्टा यतोऽन्यथाख्या
तिरतो यथार्थेति । तस्माद्विवादपदं ज्ञानं न व्यधिकरणप्रकारकं ज्ञानत्वात् संमतज्ञानवत् । भेदाग्रहजन्यरजत
त्वप्रकारक शुक्तौ ज्ञाने प्रतियोगिप्रसिद्धिः ज्ञानत्वं स्वव्यधिकरणप्रकारावच्छिन्नविषयताप्रतियोगिवृत्तिनभाव
ति ज्ञानमात्रवृत्तिधर्मत्वात् प्रमात्ववत् । न चक्षुः चाक्षुषसत्यज्ञानातिरिक्तज्ञानजनकं इंद्रियत्वात् रसनवत् इति प्र
तिरोधः अप्रयोजकत्वात् चाक्षुषज्ञानातिरिक्तज्ञानजनकत्वोपाधेश्च । अन्यथाख्यातेरपि धर्मीशे सत्यत्वात्तुल्य
न्यायतया व्यापकेपि मध्ये विशेषणत्वाच्च । एवं च स्वरूपतो विषयतश्चाग्रहीताभेदं ज्ञानद्वयमेव विसंवादिप्रवृत्तिहे
तुः तदुक्तं सन्निहितरजतशकले स्फुरितमतिर्यो द्वयोः सत्याभेदानध्यवसायादियमपि तादृक् परिस्फुरतीति व्यवहा
रमात्रस्याभेदग्रहजन्यत्वेपि तस्य संवादतदभावाभ्यां ज्ञाने यथार्थत्वायथार्थत्वव्यपदेशः । अत एव लोके उष्णजलमि
ति ज्ञानेनायथार्थत्वव्यपदेशः । उपेक्षाज्ञाने तद्व्यपदेशस्तद्योग्यत्वादिति पूर्वपक्षः ॥ ॥ राद्धांतस्तु । सत्यस्थले प्रवृत्ति

॥त्रिं०सू० मात्रेप्रतीष्टपुरोवर्तिज्ञानेहेतुतयाव्यवस्थितेतिप्रसंगवारणायविषयतयावैशिष्ट्यमेवकारतोवच्छेदकंकल्प्यते।
॥२६॥ लाघवात्कारणताग्रहसमयेज्ञानवित्तिवेद्यतयावश्यंशीघ्रोपस्थितत्वात्बाधकाभावाच्च।ननुस्वतंत्रोपस्थितेस्तत्
द्ग्रहस्याभावःकारणतातद्ग्राभेदाग्रहत्वस्यकारणतावच्छेदकंगौरवात्।कल्पनीयोपस्थितिकत्वाच्च।विशिष्टज्ञान
पिहेतुत्वेनावश्यकत्वाद्भेदाग्रहएवहेतुरितिचेन्न।विशिष्टज्ञानेतद्धेतुत्वस्यतत्कल्पनोत्तरकल्प्यत्वेनप्रवृत्तिकार
णताग्रहसमयेतदनुपस्थितेः।नचैवंमिथ्याज्ञानकल्पनेगौरवम्।प्रमाणवृत्तिसमयेसिध्यसिद्धिपराहतत्वेन
फलमुखगौरवस्यादोषत्वात्।प्रमाणवत्तत्वस्यन्याय्यत्वात्।एवंचविसंवादिप्रवृत्तिरपिविशिष्टज्ञानसाध्याप्र
वृत्तित्वात्सत्यप्रवृत्तिवत्।कॢप्तकारणंविनानुपपत्तेरनन्यथासिद्धत्वेयापरस्यासमानीतविशिष्टज्ञानबलात्तत्का
रणंसदोषमिंद्रियादिचवासर्वतोबलवतीह्यन्यथानुपपत्तिः।नचभेदाग्रहात्प्रवृत्तिरपिविपरीतचतुष्कैर्युगपत्
प्रवृत्तिनिवृत्त्यापत्तेः।नचतत्रमानाभावः।इमेरंगरजतेइतिसत्यज्ञानवत्प्रत्येकंसमसामग्र्याएकदासत्वेनतद्भेदाग्र
न्यतरानुभाविकत्वात्।अन्यथासमूहालंबनोच्छेदेलाघवप्रत्यक्षतापत्तिः।इमेरंगरजतेइतिशाब्दाभासादेववि
धात्रमसंभवाच्चाममतुदोषमहिम्नारजतरंगयोःरजतरंगभेदाग्रहान्नसंशयः।तदेवंस्वतंत्रोभयभेदाग्रहात्स
कंरंगरजतंचेतिसंशयःस्यात्।अथयहमेज्ञानाघटुपस्थितिस्तद्भेदाग्रहात्तत्रप्रवृत्तिनिवृत्तीरंगरजतधर्मेण॥हेरंब॥
हिरजतरंगेस्मारितेनरंगरजते।माषराशिस्थितमर्षविषयमाषार्थिप्रवृत्तिर्मर्षीणांलिंगत्वास्मारितमाषभेदाग्रह ॥२६॥

त्ग्रहप्रमाणारोपोऽसिद्धएव।अन्यथातत्रापिप्रत्येकमुभयज्ञानेस्यादितिमैवं।शाब्दाभासात्सत्यशीघ्रोद्दिष्टान
ष्टोपस्थितेनोतदभावात्।भेदमत्वेकधर्मेणउभयोपस्थितावपिरंगरजतयोस्तत्तयानज्ञानेदोषादिभेदयेसिद्धे।विपरी र
तज्ञानेचदोषात्।नचैवमभावरूपकाद्दोषादेवप्रवृत्तिनिवृत्तीसत्यस्थलेतदभावात्।नचैवंविसंवादिनीदोषात्।
इंद्रियलिंगशब्ददोषाणांअननुगमात्।तज्जन्यज्ञानेचजातिभेदात्।ध्यानेस्त।रंगवृत्तितयातद्धर्मस्यर
जतेउत्कटयाकांक्षानेनसहभूयःसहचारज्ञानात्।नरंगेऽल्पतथात्वादिति।तत्रानुत्कटयसाएवरजतवृत्तित
याज्ञातधर्मस्यापितथात्वादिति।तत्रानुत्कटासा।प्रतउत्कटयाकांक्षयाअनुत्कटाकांक्षाप्रतिबंधान्नरंगेनिवृ
त्तिःरजतेनप्रवृत्तिरितिचेन्न।इमेरंगरजतेइतिशाब्दाभासाद्युगपत्प्रवृत्तिनिवृत्तिप्रसंगात्शाब्दउपस्थि
ताकांक्षाल्पत्वात्।किंचैवंधर्मयोरुभयोःसहचाराक्रमसाउत्कटानुत्कटकोटिकेरंगंरजतंचेतिसंशयःस्या
त्।उत्कटानुत्कटाकांक्षाकल्पनेमानाभावात्।उत्कटत्वानिरुक्तेश्च।स्यादेतत्।संवादिविसंवादिप्रवृत्त्योर्वैजा
त्येविशिष्टज्ञानभेदाग्रहौहेतूकॢप्तत्वात्।नतुविशिष्टज्ञानंसत्यत्वासत्यत्वेगौरवादसिद्धेश्च।प्रवृत्तिनिवृत्ति
मात्रेचेष्टानिष्टपुरोवर्तिज्ञानंहेतुरितिनाननुगमः।नतुविशिष्टज्ञानंगौरवात्।नचेष्टद्ग्रहेतिप्रसंगः॥
विशिष्टज्ञानभेदाग्रहचविशेषद्वयहेतुविनासामान्यहेतोःकार्यानुदयात्।नहिनिर्विशेषसामान्यंनाम।अन्य
रू थात्वेधस्यत्वेसेवहेमहेडुद्भूतरूपवेतिचेद्रमहसिप्रत्यक्षतापत्तिः।रव्यसाक्षात्कारेहेतोःसत्वाच्च।एवंरज

॥चिं०रु० केंगे च विसंवादिन्योर्भेदाग्रहात्। संवादिन्यो विशिष्टज्ञानाभावात्। अथ रजतरंगयोः रजतरंगभेदाग्रहाद्विसं
॥२७॥ वादिन्यो बलात्स्यात्। सामग्रीसत्वात्। विसंवादिनी तत्र न संभवतीति चेत्। अत एव भेदाग्रहो न तद्धेतुः। तत्स
त्वेपि तदभावात्। न च प्रवृत्तिनिवृत्तिगतं संवादविसंवादमपेक्ष्य तद्धेतुता तज्जन्यते कारणेस्य कार्यानपेक्ष
त्वादिति। मैवं। स्वेतरनिष्टविषयत्वे निवृत्तेरिष्टविषयत्वे च विसंवादः। तथा चानिष्टविषयप्रवृत्तौ इष्टविषय
निवृत्तौ च भेदाग्रहो हेतुरिति कथं न रङ्गादावनिष्टप्रवृत्तिनिवृत्ती स्यातामिति तन्न तस्यासामर्थ्यादिति। अयं च भ्र
मः। ज्ञानं स्वविषये प्रवर्तकमित्यस्याप्रवृत्तौ संवादिप्रवृत्तौ सर्वैरवधारिते लाघवाद्बाधकाभावाच्च। अत इ
ष्टज्ञानं शुक्तौ प्रवर्तकं न तद्विषयकं तद्व्यवहारहेतुत्वात्। स्वाविषये तस्यासामर्थ्यात्। अथ भेदाग्रहात् ग्रहणस्मरणा
भावद्वयमात्र विसंवादिप्रवृत्त्युपपत्तेर्विशिष्टज्ञानकल्पने गौरवाच्च। स्वाविषयेपि ज्ञानं प्रवर्तकमिति कल्पना
सर्वैः प्रथममवधारितापि त्यज्यत इति चेन्न। प्रथमप्रवृत्तप्रमाणबलेन तत्रापि विशिष्टज्ञानकल्पनात्॥
तत्र बाधकं विना न द्वितीयेन कल्पनान्तरानुदयात् फलमुखगौरवस्यादोषत्वात्। अन्यथा सर्वैः प्रथमम्प्र
हीतापि भूयोन्विते शक्तिः सिद्धार्थदर्शनात् गौरवाच्च त्यज्येतेति साधु समर्थितं नतु मतं। स्यै ननु स्वविषये ज्ञा
नं प्रवर्तकमिति सत्यं किंतु विसंवादिप्रवृत्तावविद्ज्ञानमेव प्रवर्तकं नतु विशिष्टज्ञानमपि। तद्धि ज्ञायमानेष्टभेदाग्रह ॥हेरंबः
कारणतावच्छेदकं लाघवादिति दण्डत्ववदन्यथासिद्धं। एवं हि तत्तत्तद्व्यवहारानुकूलत्वेन तद्विषयत्वं रजतज्ञानस्य शु ॥२७॥

क्तौ नास्ति। अन्यथा रजतज्ञानस्य शुक्तिविषयकत्वापत्तिः। संविदिप्रवृत्तौ इष्टज्ञानं प्रवर्तकं तस्य विशिष्टज्ञानत्वा
वच्छेदकेनावच्छेदकत्वाभावादिति। ममसिद्धांतसार इति चेन्न। उच्यते। स्वतंत्रान्वयव्यतिरेकादिष्टज्ञानं हेतुरेव न त्वितर
हेतुतावच्छेदकमन्यथासिद्धं वा। न हीष्टज्ञानमादायैव भेदाग्रहस्यान्वयव्यतिरेकौ येन दण्डत्ववत्तदवच्छेदकं नापीष्टज्ञा
नेऽस्य भेदाग्रहात् भावे वान्वयव्यतिरेकौ येन दण्डरूपवदन्यथासिद्धं। अन्यथा गृहीतभेदेष्टस्य ज्ञानं हेतुरवच्छे
दकं भेदाग्रह इत्येव किं न स्यात्। तस्मात्स्वतंत्रान्वयव्यतिरेकशालितयाऽपि हेतुत्वं। किंचेष्टविषयप्रवृत्तिस्त्व
ले प्रवृत्तिमात्रं प्रतीष्टज्ञानस्य हेतुत्वादियमपि प्रवृत्तिस्तज्जन्या कथमहेतुं विना कार्यानुत्पत्तेः। नन्विष्टज्ञानज
न्यत्वेष्टविषयप्रवृत्तित्वमवच्छेदकं गौरवात्। बाधकं विना सामान्यसामग्र्याः कार्यकारणभावनियमात्।
अत एव तत्रापि। अथ तत्रापीष्टज्ञानमेव प्रवर्तकं देवाधीनं तस्येष्टविषयत्वमिति चेत्। तर्हीष्टेदमि
तिज्ञानादेव प्रवृत्तिः स्यात् न ह्येवं तत्रापि तत्कल्प्यमानेष्टभेदाग्रहः प्रवर्तकः। एतेन रजतज्ञानेन शुक्तिवि
षयकं तत्सति बहुव्यवहारहेतुत्वादिति निरस्तं असिद्धेः। ननु ज्ञानं यथार्थमेवेति व्याप्तिरेव तद्बाधिका। तत ए
व प्रवृत्तिमात्रे विशिष्टज्ञानं मिष्टज्ञानं च हेतु लाघवात्। स्वविषये ज्ञानं प्रवर्तकं सर्वैरेवानुप्रवृत्तौ तथाकामात्।
असत्यस्थले इष्टज्ञानमपि प्रवर्तकं न तु तेन भेदाग्रहे कल्पनतावच्छेदकमित्यन्यथाख्यातिसाधनं न भवती
ति चेन्न। तेषामनन्यथासिद्धान्वयव्यतिरेकावधारितकारणतामलब्धेन तेरव्याप्तिबाधात्। कुतस्तेन विना
। कार्यानुत्पत्तेः। विपक्षे बाधकाभावाच्च। ज्ञानानां यथार्थत्वेपि निष्कंपप्रवृत्त्यसाधुपायस्य वक्ष्यमाणत्वात्। एतेन

॥विं०म्र० ॥२७॥

केरंगे च विसंवादिन्योर्भेदाग्रहात् । संवादिन्यो विशिष्टज्ञानाभावात् । अथ रजतरंगयो रजतरंगभेदाग्रहाद्विसं
वादिन्यौ बलात् स्यातां तत्सामग्रीसत्वात् । विसंवादिनी तत्र न संभवतीति चेत् । अत एव भेदाग्रहो न तद्धेतुः तत्स
त्वेपि तदभावात् । न च प्रवृत्तिनिवृत्तिगतविसंवादविसंवादमपेक्ष्य तद्धेतुनाते जन्येत कारणे स्यतां येनापेक्ष
त्वादिति वाच्यं । प्रवृत्तेरनिष्टविषयत्वं निवृत्तेरिष्टविषयत्वं च विसंवादः । तथा चानिष्टविषयप्रवृत्तौ इष्टविषय
निवृत्तौ च भेदाग्रहो हेतुरिति कथं तत्र इष्टानिष्टप्रवृत्तिनिवृत्ती स्यातामिति तन्न तस्यासामर्थ्यादिति । प्रवृत्तिक्र
मः । ज्ञानं स्वविषये प्रवर्तकमित्याद्यप्रवृत्तौ संवादिप्रवृत्तौ सर्वैरवधारितं लाघवाद्बाधकाभावाच्च । अत इ
ष्टज्ञानं शुक्तौ प्रवर्तकं न तद्विषयकं तद्व्यवहारहेतुत्वात् । स्वाविषये तस्यासामर्थ्यात् । अथ भेदाग्रहात् ग्रहणस्मरणा
त्मकज्ञानद्वयक्लृप्तौ न विसंवादिप्रवृत्त्युपपत्तौ विशिष्टज्ञानकल्पने गौरवाच्च । स्वाविषयेपि ज्ञानं प्रवर्तकमिति कल्पना
त्सर्वैः प्रथममवधारितमपि त्यज्यत इति चेत् न । प्रथमप्रवृत्तप्रमाणबलेन तत्रापि विशिष्टज्ञानकल्पनात् ॥
तस्य बाधकं विना तद्विरोधेन कल्पनात् तथानुदयाच्च फलमुखगौरवस्यादोषत्वात् । अन्यथा सर्वैः प्रथममस्य
हीतापि क्रियान्विते शक्तिः सिद्धार्थदृष्टौ नात् गौरवाच्च त्यज्येतेति साधु समर्थितं न तु मतं । स्यैं ननु स्वविषयज्ञा
नं प्रवर्तकमिति सत्यं किंतु विसंवादिप्रवृत्तौ विद्धज्ञानमेव प्रवर्तकं न तु विशिष्टज्ञानमपि । तर्हि ज्ञायमानेष्टभेदाग्रहे ॥हेरंब॥
कारणतावच्छेदकं लाघवादिति दण्डत्ववदन्यथासिद्धं एवं हि तत्प्रति बहुव्यवहारानुकूलत्वे तद्विषयत्वं रजतज्ञानस्य शु ॥२७॥

क्तौ नास्ति । अन्यथा रजतज्ञानस्य शुक्तिविषयकत्वापत्तिः । संवादिप्रवृत्तौ इष्टज्ञानं प्रवर्तकं तस्य विशिष्टज्ञानत्वा
दभेदेनावच्छेदकत्वाभावादिति । मम सिद्धान्तसार इति चेत् । उच्यते । स्वतंत्रान्वयव्यतिरेकाद्दिष्टज्ञानं हेतुरेव न त्वितर
हेतुतावच्छेदकमन्यथासिद्धत्वात् । न हीष्टज्ञानं भेदाग्रहे वा भेदाग्रहस्यान्वयव्यतिरेकोपि न दण्डत्ववत्तदवच्छेदकेनापीष्टज्ञा
नेष्टभेदाग्रहात्मकत्वे वान्वयव्यतिरेकौ येन दण्डरूपवदन्यथासिद्धं । अन्यथा गृहीतभेदेष्टज्ञाने हेतुत्वावच्छे
दकं भेदाग्रह इत्यपि वदितुं स्यात् । तस्मात् स्वतंत्रान्वयव्यतिरेकशालित्वायोरपि हेतुत्वं । किंच इष्टविषयप्रवृत्तिस्थ
ले प्रवृत्तिमात्रप्रतीष्टज्ञानस्य हेतुत्वादियमपि प्रवृत्तिस्तज्जन्या कुत्र हेतुं विना कार्यानुत्पत्तेः । न च इष्टज्ञानज
न्यत्वेष्टविषयप्रवृत्तित्वमवच्छेदकं गौरवात् । बाधकं विना सामान्यसामग्र्याः कार्यकारणभावनियमात् ।
अत एव तत्रापि धीरपि । अथ तत्रापीदज्ञानमेव प्रवर्तकं देवाधीनं तस्येष्टविषयत्वमिति चेत् । तर्हीष्टभे
दज्ञानादेव प्रवृत्तिः स्यात् न ह्येवं तत्रापि तद्व्याप्यमानेष्टभेदाग्रहः प्रवर्तकः । एतेन रजतज्ञानेन शुक्तिवि
षयकं तत्सति बहुव्यवहारहेतुत्वादिति निरस्तं असिद्धेः । ननु ज्ञानं यथार्थमेवेति व्याप्तिरेव तद्बाधिका । तत्र
वप्रवृत्तिमात्रे विशिष्टज्ञानमिष्टज्ञानं च हेतुर्लाघवात् । स्वविषये ज्ञानं प्रवर्तकं सर्वैरेवाद्यप्रवृत्तौ तथा क्लृप्तत्वात् ।
असत्यस्थले इष्टज्ञानमपि प्रवर्तकं न तु तत्र भेदाग्रहे कारणतावच्छेदकमित्यन्यथाख्यातिसाधनं न संभवती
ति चेत् न तेषामनन्यथासिद्धान्वयव्यतिरेकावधारितकारणतामलब्धस्वेनैरव व्याप्तिबाधात् । कुत्र हेतुं विना
।कार्यानुत्पत्तेः । विपक्षे बाधकाभावाच्च ज्ञानायथार्थत्वेपि निष्कंपप्रवृत्तस्य भूपायस्य वक्ष्यमाणत्वात् । एतेन

॥किं०भू०
॥२८॥

संस्कारोद्[illegible]स्यां प्रत्यभिज्ञानवदुभयाभासादितो वा परस्परसंसर्गविरहिण्येकज्ञानेन भवति ज्ञाने यथार्थमे-
वेति व्याप्तेरिति निरस्तं। व्याप्त्यसिद्धेः। सामग्र्याः कार्यावश्यकत्वाच्च॥ एकदेशिनस्तु रजतरंगयोर्रजतरंग-
भेदाग्रहान्न युगपत्प्रवृत्तिनिवृत्ती। न चान्यथाख्यातिः दोषवशात्पुरोवर्तिनं विहाय स्मृतरंगरजताभ्यां पुरोव-
र्तिनि भेदाग्रहात् न च रजतत्वेन स्मृतिः संस्कारगोचरसर्वरजतविषया स्यात् सामान्यप्रत्यासत्तेस्तत्संभवा-
दिति वाच्यं। तत्तोद्वाररजतत्वेन प्रत्यासत्तावपि दोषात् स्मृत्यनुभवप्रतिबन्धवदुपपत्तेः। किंच प्रत्यक्षे सामान्य-
प्रत्यासत्तिः स्मरणे तु मनः करणं संस्कारः प्रत्यासत्तिः न तु तस्य सामान्यप्रत्यासत्तिः अकरणत्वादिति केचित्।
एकं रंगरजतमात्रज्ञानानन्तरं तयोरेव यमजयो वा विपरीतवत्तुर्वेति प्रसंगादन्यथाख्यातेर्वा। अन्ये तु रजत
नेदं रजतमिति ज्ञाने रजतत्वासंसर्गासंसर्गाग्रहरूपं रजतभेदासंसर्गाग्रहरूपं वा प्रवृत्तिप्रतिबन्धकमिति
तन्न। अन्यवृत्तितयोपस्थितस्य रजतत्वासंसर्गस्य रजतभेदस्य चासंसर्गो संसर्गान्निवृत्तिप्रसंगात्। रंगे
तयोरसंसर्गग्रहे अन्यथाख्यातिः। रजते रजतभेदासंसर्गो संसर्गस्यासंसर्गाग्रहान्निवृत्तिरिति चेन्न।
भेदासंसर्गासंसर्गस्य भेदसंसर्गरूपत्वे रजतभेदसंसर्गासंसर्गाग्रहाद्रंगे निवृत्तिप्रसंगात्। रजतभे-
दसंसर्गासंसर्गाग्रहे चान्यथाख्यातिः। रजतवृत्तितयोपस्थिते भेदे रजतभेदेन सह भेदाग्रहः। प्रवृत्तिप्र-
तिबन्धकः। एवं रंगे निवृत्तावपीति चेन्न। एवमपि शब्दाभासायुगपत्प्रवृत्तिनिवृत्त्योरनुपपत्तेः। प्रवृत्ते १

श्रीहरिः
॥२८॥

निवृत्तिविषयनिष्ठभेदयोरजतरंगभेदयोश्च शब्दादनुपस्थितस्याप्रतिबंधकत्वाभावात्। अपरे तु। पुरोवर्तिनिष्ठतया ज्ञाने भेद इ-
ष्टानिष्टप्रतियोगित्वाभावग्रहात् प्रवृत्तिनिवृत्ती। तथा हि रंगे रजतात् भेदः सन्नपि दोषान्नभासते। अन्यस्माद्भासित एव। तथा
च रंगवृत्तितया ज्ञाते भेदे रजतप्रतियोगित्वाभावग्रहाद्यथार्थादिव रंगे प्रवृत्तिः। रंगप्रतियोगित्वाभावः सन्नपि दोषान्नभा-
सत इति तत्र न निवर्तते। भेदे रंगप्रतियोगित्वाभावग्रहात् रजते निवर्तते रजतप्रतियोगित्वाभावः सन्नपि दोषान्नगृह्य-
त इति। एवं रजतनिष्ठतयोपस्थितत्वेन युगपत्प्रवृत्तिनिवृत्ती। न च रंगवृत्तिभेदत्वे रजतभेदेऽप्यस्तीति तेन रूपेण साक्षिभा-
सते सामान्यबुद्धेः सर्वविशेषविषयत्वात्। तथा च रजतभेदेपि तत्प्रतियोगित्वाभावग्रहेन्यथाख्यातिरिति वाच्यं। प्रत्या-
सत्तावपि रंगवृत्तिभेदत्वेन रजतभेदस्य दोषेण ग्रहणादिति। मैवम्। इदं रजतमिति ज्ञानमन्वयव्यतिरेकाभ्यां प्रवर्तकम-
भिमतमनुभवसिद्धं। तच्च सत्यस्थले विशिष्टज्ञानं अन्यत्र ज्ञानद्वयमेकं वेति विवादः। तत्र तज्ज्ञानेन प्रवर्तकमित्यनुभवबाधि-
तेतदपि हेतुविरहेपि न सत्यस्थले तदभावात् विशिष्टज्ञानापेक्षया गुरुत्वात्। शब्दाभासस्य यतो भेदादिज्ञानाभावाच्च
एवं निवृत्तावपि॥ अन्ये तु इदंवृत्तितया गृह्यमाणेऽनिष्टवृत्तितया वा गृह्यमाणो धर्मः स्वाश्रये प्रवर्तयति स च धर्मो र-
जते रजतत्वं रंगे रजतसादृश्यं एवं निवृत्तावपीति न युगपत्प्रवृत्तिनिवृत्ती इति। तन्न। एवं हीमे रंगरजते इति शब्दाभासा-
द्रंगरजतयोः प्रवृत्तिनिवृत्ती न स्यातां। रंगे रजतवृत्तिधर्मस्य रजते रंगवृत्तिधर्मस्य च शब्दाभासादनुपस्थितेः। न च
शब्दानन्तरं तत्त्वेन तदुपस्थितिः तत्रैव तु नेशाद्यप्रतिवाच्यं। अनन्यथासिद्धशब्दानुविधानात्। इमे रंगरजते इति स्व-
ज्ञाने यथार्थमनः इत्यत्रैव इमे रंगरजते इति प्रतारकविश्वासेन प्रवृत्तिनिवृत्तिदर्शनाच्च॥ इतरे तु। रजते रजतत्वे

॥विं॰मू॰ चरमपते दोषात् तथा च रजतवृत्तितया यावदुपस्थितधर्मस्य रजतत्वेनासंग्रहान्न प्रवर्तते। रंगवृत्तितयोपस्थितस्य कस्यचिद्धर्मस
॥२९॥ र रतत्वेन संसर्गाग्रहान्न प्रवर्तते। एवं निवृत्तावपि यथा तत्वासद्ग्रह इति मानान्तरादुद्ग्रहः। तदेव यद्रूः तद्या रजतत्तदाचिरज
नवृत्तितया यावदुपस्थितस्य रजतत्वेन संसर्गाग्रहः प्रतिबन्धक इति। न च एवं दर्शनाथादिदिशि। ज्ञानस्य लघुत्वेनान्वयव्यति
रेकाभ्यां हेतुत्वात्। न च हेतुत्वभावेऽप्यासत्तिज्ञानवत् संस्कारे द्वितीयस्याविशिष्टज्ञानसंभवात्। तस्य ज्ञाने हेतुत्वे पादोऽहं
तस्य तदेव कर्मानत्वात्। न चैवं विषयत्वेन तयोः परस्परसहकारिता नाम विशिष्टज्ञानाभिप्रत्ययं नाभिप्रत्यभिज्ञानेनैव त
ताशेचनदभावात् गौरवाच्च। न चातिप्रसंगः। तदाग्रहस्यापि तद्धेतुत्वात्। अथ प्रत्यभिज्ञायामेवमपि तत्ताशे
न साक्षात्कारित्वं तदिन्द्रियसन्निकर्षो न तज्ज्ञानजन्यत्वात्। किन्तु स्मृतित्वे पुरोवर्तिनश्च साक्षात्स्मृतित्वमनुभवत्वं
न जातिरव्याप्यवृत्तित्वेतिचेत्। तर्हि संस्कारादसन्निकृष्टमपि भासतामिति तवाप्यनुमतं। न चात्र तत्वैकत्वी स्यात्प्रत्यभि
ज्ञावदिदं रजतमित्येवं ज्ञानमस्तु। तत्सामग्रीसत्वात्। ममादिन्द्रियजन्यत्वात् जात्यसंकरात् साक्षात्कारित्वमेवमपि चेत्॥
ननु योपस्थापकसाक्षात्कारत्वस्य तदिन्द्रियसन्निकर्षजन्यः। न च रजते स इहास्तीति चेन्न। प्रत्यभिज्ञाया इन्द्रियजन्यतया
साक्षात्कारित्वे न तत्तांशे नाभिव्यभिचारात्॥ संस्कारस्य स्मृतित्वे सन्निकर्षत्वाच्च। न च रजतत्वप्रत्यक्षे संयुक्तस
मवायस्य प्रत्यासत्तित्वेन हेतुत्वात् तेन विनान तदितियाच्यं॥ तर्हि विशिष्टज्ञाने विशेषणज्ञानोपक्षीणत्वात्॥ न हि वि ॥हे॰रं॰ब॥
शिष्टधीसामग्रीसत्वे न विलातद्विलंबः॥ अपि च विशेषणज्ञाने विशेष्यसंबन्धस्तदुपायात्संस्कारेणतस्यहेतु ॥२९॥

सर्गाग्रह इति प्रत्यभिज्ञासत्यप्रत्यक्षसाधारणस्य विशिष्टप्रत्यक्षहेतोः भ्रमेपि सत्वात्। रजतसाक्षात्कारे रजतसं
योगस्य हेतुत्वेपि विशिष्यसन्निकर्षत्वेन हेतुता न तु रजतसंयोगत्वेन। यत्सामान्ये यत्सामान्यं हेतुस्तद्विशेषे त
द्विशेषस्य हेतुत्वनियमात् संयोगस्य विशेष्यभानसामग्र्यन्तर्गतत्वेनान्यथासिद्धतया विशेष्यसामग्र्यन्तर्भू
तत्वेनात् गौरवाच्च। प्रत्यक्षहेतुत्वेन कॢप्तविशेष्यसंबन्धादेव तदुपपत्तेः। अपि च॥ भ्रमे तत्र स्वतन्त्रोपस्थितेष्टसं
दाग्रहकारणतापेक्षया रजतसन्निकर्षैरेव विशेष्यसन्निकर्षत्वेन हेतुत्वस्य हि लघुत्वाच्च॥ वस्तुतः तत्र दोषादृष्टम
दृष्टमप्यसिद्धं॥ न च भ्रमे मानासंसर्गाग्रहाभावः तस्यापि विवरणरूपस्य साध्यत्वात्। तज्ज्ञानरूपत्वे च तस्य भ्रमा
त्वेन दोषाजन्यत्वात्। भ्रमस्त्वानामिषितःप्रमादोषजन्यैवेति चेत्॥ न। तस्याः कॢप्तसामग्र्यन्तरजन्यत्वादिति
भ्रमोस्तत्वज्ञानमित्यसन्निकृष्टमपि दोषाद्भासतामित्युपेयं। अपि च दोषस्य विशिष्टज्ञाने व्यापारः प्रवृत्ती
तद्धेतुत्वस्य कॢप्तत्वात्। न च भेदाग्रहः कल्पनीयः कारणाभावत्वात्। यत्तु दृष्ट्वा न्यूर्थेनेति। तन्न। बीजेन्द्रियादि
साधारणं नैकदृष्टत्वमस्ति। एवं प्रत्यक्षमप्यन्यथाख्यातौ मानं कारणबाधाभावात्॥ तथाहि इदं रजततया जा
नामीत्यनुव्यवसायसाक्षिकमेवास्यान्यथाभानं। नहि विषयत्वेनानुव्यवसायादन्यत्प्रमाणं। न च तद्विषयस्तज्ज्ञा
नविषयत्वेन तदविषयत्वे न हि विषयत्वेन वानुव्यवसीयते। अन्यथावरतायस्य प्रमात्वनियमात्। अन्यथा घ
ज्ञानेपिरं टं जानामीति स्यात्। न च भेदाग्रहदशायां रजतत्वज्ञानत्वविषयत्वासंसर्गाग्रहः शुक्तावपि दृश्यते शुक्तौ

॥चिं॰ख्या॰ रजतत्वेन मया ज्ञातमिदं कौरजतज्ञानं मम वृत्तमित्यनुव्यवसायात्। अथ विचारसाध्यासंसर्गाग्रहबाध्योपमसंसर्गा
॥३०॥ ग्रहत्वेन विचारं विनासंसर्गाग्रहे व्यवतिष्ठत इति चेत् न। इदं रजतत्वया जानामीत्यस्य शुक्तिकर्म्मकरजतत्वप्रकारकज्ञा
नानुव्यवसायमसंसर्गाग्रहस्यात्मानुभवसिद्धत्वात्। तादृशज्ञानाप्रसिद्धेः। नन्वेवं जानामि रजतं जानामीति तदाकारः। नत्वी
यार्थस्य प्रकारत्वेन प्रकारिणो भानेऽप्यमानमसंसर्गाग्रहः॥ विशेषणज्ञाने च सर्वत्र विशेषणविशेष्यमित्यन्यथा
भानमपि तथा। ज्ञाने रजतत्वानुपगमाद्धि विशेषणविशेष्यविषयत्वाच्चेन साक्षात्कवादः। यत्तु धियां मिथ्यात्वेन
बाध्यबाधकभावव्यवस्थानस्यादिविशेषादिति। तन्न। अन्येनान्यथासिद्धायाबाधकत्वात्। तथा हि। यत्र दु
ष्टादुष्टेन्द्रियजन्यं परस्परनिरपेक्षमेकत्र विरुद्धज्ञानद्वयमुत्पद्यते तत्र प्रथममनुपजातविरोधित्वात् ज्ञा
नागतं बाधते तस्याप्राप्तत्वात्। उत्तरं तु स्वकारणादुत्पाद्यमानमनुपजातविरोधिनयानानुपमर्द्य पूर्वमुत्प
त्तुमर्हतीति पूर्वबाधात्मकमेवोत्पद्यते अन्यथा नोत्पद्यतेव॥ न चैवमेवेति वाच्यम्। अनुभवविरोधात्। तदाहुः॥
पूर्वात्परबलीयस्त्वं तत्र नाम प्रतीयते। अन्योन्यनिरपेक्षाणां यत्र जन्म धियां भवेदिति। यत्र पूर्वापेक्षमुत्त
रज्ञानमुत्पन्नमनुत्पन्नं तत्र पूर्वाविरोधेनोत्तरं नोत्पद्यते अतोऽज्ञातं सत्त्वपूर्वं बाधते॥ यथा प्रत्यक्षा
दिविरुद्धानुमितिः॥ न चैवं भ्रमस्य किं बाध्यते॥ न स्वरूपं तस्य सत्त्वात्। नापि रजतत्वप्रकारकत्वं शुक्तिविषयक ॥हेरंब॥
त्वं वा। तयोरपनेतुमशक्यत्वात्। जानाति हि न रजतत्वेन शुक्तिं विषयीकृत्य। नापि व्यवहारः प्रवृत्त्यादिर्वृत्तत्वात्॥ ॥३०॥

॥

नाप्यनागतव्यवहारजननत्वं तस्य क्षणमात्रावस्थितत्वात्। उच्यते। बाधकेन भ्रमस्य प्रमात्वबुद्धिरेव बाध्यः॥
यत्तु धियामयथार्थत्वे कथमाश्वास इति। तन्न। प्रामाण्यग्रहोपायस्य दर्शितत्वात्। सत्यत्वनियमेऽपि सदसंसर्गा
ग्रहस्याग्रहीतासंसर्गज्ञानद्वयस्य च बहुशोदर्शनात् कथमाश्वास इति॥ अथ सदसंसर्गाग्रहस्य प्रतिसंधा
ने विलंबितस्य द्विषयत्वं च शीघ्रोपस्थितमिति सोऽसंसर्गे वृत्तद्विषयत्वं न हि विश्वासः यत्र क्वचिद्विसंशयस्तत्र
ज्ञानान्तरादेव संशयनिवृत्तिरिति चेत्। ममाप्यसंसर्गबुद्धियां सत्यत्वबाधकेनापाद्यतत्वे इति तद्ग्रहवतारात्तस्य
त्वविश्वासः। किं च तत्र वृत्तानंतरं प्रविश्वासः॥ विशेषदर्शनाद्विश्वासस्तत्समयं वा यथा च ज्ञानेनत्रापि सद्गृहस्तथोक्त
परतःप्रामाण्यात्। अन्ये तु स्मृतप्रायोग्यवैयधिकरण्यावच्छिन्नवाधिकरणेन ज्ञानेन वा तत्र प्रत्यक्षत एव गृह्यत इति युक्तो विश्वासः।
अप्रायोग्यभेदवैयधिकरण्ये भेदसंशये ज्ञानानंतरादविश्वासः सरति। तत्र भ्रमयत्रापि ज्ञानांतरादविश्वास इत्यसत्त्वमतेन
विशेषधर्मनमात्रत्वात्। वस्तुतस्तु भेदाग्रहादेवाभेदव्यवहारोपपत्तावभेदविषयत्वं क्वापि न सिद्धमसंसर्गोऽतिदत्तध्वंस
द्विषयत्वसिद्धिः॥ यत्तु दोषानन्हेतुरिति तन्न। फलबलेन तथात्वकल्पनात्। अथेदं रजतमिति ज्ञानं कथमयथा
र्थं इदं रजतयोः सत्त्वात्॥ न च तत्र भ्रयतादात्म्यमसत्। तदुभयतादात्म्यं चेत्सत्तत्तदधिकस्याभावात् तथा
सत्वात्। अपसत्वे च सतः ख्यातिः। एवं संसर्गारोपपीति उच्यते। सम्मात्रविषयकत्वेऽपि तद्भावविति तच्च
रत्वेन प्रकारव्यधिकरणे विषयतो क्तो वायथार्थत्वा॥ अन्यस्तु तादात्म्यारोपसंसर्गयोरसत्तार्थविषय

॥वि॰मू॰ यत्तु मन्यंते। नैवमसत्ख्यातिः। सदुपरक्तस्यात्यंतासतःख्यात्यनुपगमात् सदनुपरक्तस्यात्यंतासतःख्या-
॥३१॥ तिरसत्ख्यातिर्नोत्पद्यते॥ कारणाभावात्। तदनुपपत्तिस्तुल्यैवेति चेन्न। अत्र विशिष्टज्ञानसामग्र्यादर्शि-
तत्वात्। तदुक्तं वाचस्पतिमिश्रैः। तस्माद्यदन्यथासत्तमन्यथा प्रतिपद्यते। तन्निरालंबनं ज्ञानमसदालंबनं न त-
दिति॥ ॥श्रीगणेशाय नमः॥ सा च प्रमा चतुर्विधा प्रत्यक्षानुमित्युपमितिशाब्दभेदात्॥ एवं च तत्करणं करणं
प्रमाणमपि चतुर्विधं॥ प्रत्यक्षानुमानोपमानशब्दभेदात्॥ अन्येषां यथायथमत्रैवांतर्भावात्॥ तथा च क्र-
मः॥ ननु न तावत्प्रत्यक्षमिंद्रियार्थसन्निकर्षे तज्ज्ञानमव्याप्ति चात्मानुमित्यादौ ज्ञानमात्रे चातिव्याप्तिः। आत्ममनोर्थस्य तिस्य
मनसेंद्रियेण संयोगात्तदुत्पत्तेः। ईश्वरप्रत्यक्षाव्याप्तेश्च सन्निकर्षस्य संयोगादित्वेनानुगमात् संयोगाद्यन्यतमत्व-
स्य चानिर्धारितैकरूपत्वेनागासिद्धेः। उत्तरभेदसाधनेऽव्यर्थविशेषणत्वं चाइंद्रियार्थयोरेकजन्यत्वेस्य लक्षणत्वे व्यर्थ-
विशेष्यत्वे। न च तयोरेकजन्यमेव लक्षणं। आत्ममनोजन्यत्वेन ज्ञानमात्रमतत्वात्॥ इंद्रियस्य प्रत्यक्षनिरूपत्वाच्च॥
नापि ज्ञानाकरणजन्यत्वे सति सत्त्वानुभवः प्रत्यक्षं। लिंगादेरजनकतया ज्ञानस्याज्ञातस्य करणत्वेनानुमित्यादौ गतत्वा-
त्। ज्ञानाजन्यानुभवः सत्यदुःखपि न॥ विशिष्टप्रत्यक्षाव्याप्तेः तस्य विशेषणज्ञानजन्यत्वात्। नापि सत्त्वे सति साक्षा-
त्कारित्वं। नियतव्यंजकाभावेन प्रत्यक्षमशक्यतया तस्य जातित्वासिद्धेः। सत्त्वे वा तदेव लक्षणं निमित्तमस्तु व्यवहारे इदं ॥दे रबा॥
जास्य॥ उच्यते॥ प्रत्यक्षस्य साक्षात्कारित्वं लक्षणं। चाक्षुषादिज्ञानेषु साक्षात्करोमीत्यनुगतबुद्धिबोधकं विनैव तेन। ॥३१॥

जातिविषयत्वात्॥ नेंद्रियजन्यत्वं तथा अन्योन्याश्रयात्॥ इंद्रियस्यातींद्रियत्वाच्च॥ न च नियतव्यंजकाभावान्न जा-
तिः। गोत्वादौ सास्नादेरिवाननुगतस्यापि चक्षुःकरणकानुभवत्वादेर्व्यंजकत्वात्। न च जातावनुगतव्यंजकनियमः
ज्ञानेच्छाद्युपलब्धसुखदुःखत्वादौ तदभावात्। प्रत्युत नियतव्यंजकसत्त्वे जातिसिद्धिरेव॥ न तत एवानुगतबुद्धेरुपपत्तेः॥
निर्विकल्पकेश्वरप्रत्यक्षे च साक्षात्कारित्वं धर्मिग्राहकमानसिद्धं॥ योगजधर्मजन्यजन्यस्वविषयकसाक्षात्का-
जन्यसामान्यलक्षणप्रत्यासत्तिजजन्येन्यप्रत्यक्षलक्षणस्य लक्षणमनागतगोचरसाक्षात्कारहेतुप्रत्यासत्त्य-
जन्यजन्यसाक्षात्कारित्वं॥ अन्ये तु सामान्यज्ञानप्रत्यासत्त्येंद्रियसंबद्धविशेषणतोत्पत्तौ वा तज्जन्यं प्रत्य-
क्षसंग्राह्यमेवेति। यद्वा विशेष्यत्वेन स्वविशेष्यजन्यं ज्ञानं सत्यप्रत्यक्षं। आत्मविशेष्यकानुमितिशाब्दस्मृ-
तिषु तस्य विशेष्यत्वेन न हेतुत्वं विशेष्याद्विनापि तदुत्पत्तेः। किं तु समवायित्वेन। यद्वा इंद्रियजन्यज्ञानं जन्यप्र-
त्यक्षं। इंद्रियत्वेन जनकत्वे विवक्षिते। जन्यप्रत्यक्षमात्रे इंद्रियत्वेन चक्षुरादीनां कारणता। अनुगतहेतुं विनानुग-
तकार्यस्याकस्मिकतापत्तेः। स्मृत्यनुमित्यादौ च मनस इंद्रियत्वेन हेतुत्वं किं तु मनस्त्वेन। अन्यथा स्मृत्यादेः साक्षा-
त्कारितापत्तिः। इंद्रियत्वं च स्मृत्यजनकज्ञानकारणमनःसंयोगाश्रयत्वं। प्राणशरीरात्मानश्च स्मृतिजनकमनःसं-
योगवंतः। शब्देतरोद्भूतविशेषगुणानाश्रयत्वे सति ज्ञानहेतुमनःसंयोगाश्रयत्वं वा। ज्ञानाकारणकं ज्ञानं
प्रत्यक्षमिति तु वयं। विशिष्टप्रत्यक्षे च न विशेषणज्ञानं कारणं व्याप्यभावात्॥ विशिष्टवैशिष्ट्यप्रत्यक्षे च

॥चिं॰म॰॥
॥३२॥

विशेषणज्ञानं हेतुः। न तु विशेष्यविशेषणधीरपि। विशेषणधीद्वारा करणं। मानाभावात्। प्रत्यभिज्ञायां तु
तत्तास्मृतिः करणं न तु संस्कारद्वारानुभवः करणं। तस्याः संस्कारजन्यत्वे स्मृतित्वापत्तेः। स्मृतित्वं तु येन
संस्कारजन्यत्वस्य तत्र सत्त्वात्। तद्धेतुत्वेनैव तत्सिद्धेश्च। प्राभाकरास्तु। साक्षात्त्वं प्रत्यक्षसाक्षात्त्वं च न जातिः।
नियतव्यञ्जकाभावात्। नापि सविकल्पकानपेक्षज्ञानत्वं। प्रत्यभिज्ञासादृश्यादिप्रत्यक्षाव्यापनात्। निर्विकल्प
ज्ञाने यद्विषयकत्वं सविकल्पकाजन्यं तत्र साक्षात्त्वं। मितिमात्रसाक्षात्त्वे सर्वज्ञानं प्रत्यक्षं ज्ञानाजन्यत्वात्। जा
तावनुगतत्वधीरपि प्रत्यक्षा जातिव्यक्तिनिर्विकल्पजन्यत्वात्। सादृश्यादिविशिष्टवैशिष्ट्यप्रत्यक्षे च विशेष
णज्ञानं हेतुः तेन विनापि युगपदिन्द्रियसन्निकर्षे विशिष्टज्ञानोदयात्। दीर्घादिप्रत्यक्षे च न ह्रस्वादिज्ञाना
पेक्षा किं तु तद्व्यवहारे। अनुमित्यादौ शेषांशे प्रत्यभिज्ञायाञ्च तत्तांशे ज्ञानजन्यत्वान्न प्रत्यक्षत्वं किं तु परोक्षत्व
मेव मितिमात्रांशे इदन्तांशे च द्वयोरपि प्रत्यक्षत्वं यत्तु तत्ताप्रकारकत्वात् तत्तासविकल्पकत्वेन न कारणता किं तु त
ज्ज्ञानत्वेनेति तन्न। अनुमित्यादावपि लिङ्गादिज्ञानत्वेनानुमेयादिज्ञाने तत्त्वमत्वादिति। अत्रोच्यते। य
दि तत्तायां प्रत्यभिज्ञा परोक्षानुभवरूपा तदानीं तस्य तत्र हेतुलिङ्गाद्यभावात्। तत्ताज्ञानसहितमिन्द्रियं
जनकमिति चेन्न तर्हीन्द्रियजन्यत्वात्तत्र साक्षात्त्वे वस्यात्। न च ज्ञानानपेक्षेन्द्रियजन्यत्वं तत्र तन्त्रं गौरवात्।
ज्ञानसहितेन्द्रियजन्यत्वेनेदन्तांशेऽप्यप्रत्यक्षत्वप्रसङ्गाच्च। न ह्येकस्मिन् ज्ञाने जनयितव्ये तदपेक्षा तदनपेक्षा।

॥हेरंब॥
॥३२॥

क्षं भवति। अंशे तज्जन्यमपीति चेन्न ज्ञाने अंशस्य विषयत्वेन तदजन्यत्वात्। एवं मितिमात्रांशेनापि सर्वज्ञानं प्रत्य
क्षमिन्द्रियाजन्यत्वात्। साक्षात्कारे तस्य कारणत्वात्। मनोजन्यत्वेनानुमेयांशेऽपि तत्प्रसङ्गः। न च ज्ञानमात्रसा
मग्रीजन्यत्वं प्रत्यक्षत्वे तन्त्रं गौरवात्। ज्ञानमात्रे च न ज्ञानत्वं तस्याजन्यत्वात्। नापि सर्वज्ञानं प्रत्यक्षज्ञानं प्रत्येकं स
र्वज्ञानसामग्र्यजन्यत्वात्। सर्वज्ञानसामग्र्यप्रसिद्धेश्च। अपि च ज्ञाने अवयवाभावेनांशोऽपि विषय एव विषय
च ज्ञानं न कारणं अतोऽनुमितिप्रत्यभिज्ञानयोः स्वविषयेऽनुमेयेऽपि तत्तायां च प्रत्यक्षत्वं स्यात्। विषयस्य सविक
ल्पकाजन्यत्वात्। अथ प्रत्यभिज्ञायास्तत्ताविषयत्वे तज्ज्ञानं कारणं एवं अनुमित्यादौ मेयविषयत्वे मितिमात्र
इदन्ताधर्मिविषयत्वे न ज्ञानं कारणं किं तु ज्ञानसामग्रीति चेन्न। तद्विषयत्वं हि ज्ञाने स्वकारणाधीनं तदंशस्वभाव
त्वे स्वरूपविशेषः स च ज्ञानाजन्य एव। इदन्ताज्ञानादौ चाव्याप्तिः तस्यानुमित्यादिवद्विशिष्टज्ञानत्वे विशिष्टज्ञान
जन्यत्वात्। न च परोक्षत्वमुपाधिः। प्रत्यभिज्ञायां प्रथमोत्पन्नजातिव्यक्तिज्ञानजन्यजातेरनुगतत्वप्रत्यक्षे च साध्या
व्यापकत्वात्। पूर्वव्यक्तिवर्तित्वे सति एतद्व्यक्तिवर्तित्वमनुगतमिति तत्र पूर्वानुभूतत्वस्य विशेषणत्वेन तज्ज्ञान
स्यानुगतत्वप्रत्यक्षे कारणत्वात्। अन्यथा प्रथममप्यनुगतत्वधीप्रसङ्गः। अत एव ज्ञानसाक्षादजन्यं ज्ञानं प्रत्यक्षं
प्रत्यभिज्ञायां तु संस्कार एव च साक्षाज्जनकः। जातावनुगतत्वधीरपि संस्कारजन्या एवं सादृश्यादिप्रत्यक्षेऽपि
प्रतियोगिसंस्कार एव कारणमिति। मिश्रास्तु। इदं ज्ञानानुपावजन्यं [illegible] प्रत्यक्षं धारावाहिकविशिष्टप्रत्यक्षे चाव्या

॥न्किं०म०
॥३३॥

पनात्। उत्तरविशिष्टज्ञाने पूर्वविशिष्टानुभवस्यैव विशेषणज्ञानत्वेन हेतुत्वात्। संस्कारस्य स्मरणेतराजनकत्वाच्च
अन्यथा प्रत्यभिज्ञादेः संस्कारजन्यत्वेन स्मृतित्वं स्यादित्युक्तत्वादिति॥ प्रत्यक्षविशेषे सन्निकर्षविशेषो हेतु-
रनुमात एव संयोगेन द्रव्यग्रहः संयुक्तसमवायेन रूपकर्मगोत्वादेर्ग्रहणं॥ संयुक्तसमवेतसमवायेन रूपत्वादेः
समवायेन शब्दस्य समवेतसमवायेन शब्दत्वादेः विशेषणतया शब्दाभावस्य इंद्रियसंबद्धविशेषणता-
या समवायघटाभावादेः॥ योग्यसन्निकर्षाद्ग्रहो न सन्निकर्षमात्रात्। अथ सूक्ष्मावयवावच्छेदेनावयवसं-
योगेपि न तद्ग्रह इति महावयवावच्छेदेन संयोगो हेतुः॥ तथा चावयवेंद्रियसंयोगो हेतुः॥ न च ग्राह्यसंयोगाव-
च्छेदकावयवसंयोगापेक्षया ग्राह्यसंयोगस्य लघुत्वात्स एव हेतुरिति वाच्यं॥ तस्यातिप्रसक्तत्वात्॥ एतेन स्वावय-
वसंयोगापेक्षया स्वसंयोगस्य हेतुत्वात्स एव हेतुरस्त्विति निरस्तं॥ अतिप्रसंगात्। नाप्यवच्छेदकसंयोगेनान्यथासि-
तर द्धिः तत्राप्यवच्छेदकसंयोगेनान्यथासिद्धिरिति संयोगो हेतुरेव न स्यादिति वाच्यं॥ अल्पतरतमसंयोगावच्छेदेन सं-
योगस्य हेतुत्वे अतिप्रसंगादिति॥ मैवम्॥ द्रव्यग्रहे अवयविमात्रग्रहे वा सकलावयवावच्छेदेन संयोगो न हेतुः आत्म-
त्रसरेण्वादेः सर्वभागग्रहे व्यभिचारात्। किं तु घटादिग्रहे स हेतुः एवं चात्मादिद्रव्यग्रहो ग्राह्यसंयोगजन्य इति घ-
टादिग्रहोपि तद्वदेव ग्राह्यसंयोगजन्य इति तस्मिन्सत्यपि घटादिग्रहो नास्तीति यदि तदास्तु लाघवः संयोगा- ॥हेरंब॥
वच्छेदकोऽस्तु तत्संयोगोपि वा हेतुः॥ न तूक्तहेतुपरित्यागः॥ ननु संयुक्तसमवायेनावयविग्रहोस्तु न संयो- ॥३३॥

गस्तत्र हेतुस्तस्य रूपादिग्रहे क्लृप्तत्वात्॥ न च लाघवात्संयोग एव तथा। तस्य कल्पनीय[illegible]यविग्रहे वा संयुक्तसमवायः
[illegible]कारणाभावत्वादिति चेत्। न आत्मग्रहे इंद्रियसंयोगस्य कारणत्वादन्यत्रापि द्रव्यसाक्षात्कारे तथा कल्पनात्
॥ न च बहिरिंद्रियजद्रव्यग्रहे अवयवग्रहे वा संयुक्तसमवायः कारणं॥ लाघवेन संयोगस्यैव कारणत्वेन कल्प-
नात्॥ ननु संयुक्तसमवायो न गंधग्राहकः किं त्वाश्रयसंयोग एव गंधवद्ग्रहोप्याश्रयसंयोगादेवेति संयुक्तसम-
वेतसमवायो न हेतुः न च गंधे सति गंधसमवायं विना गंधाग्रहोस्ति। न चैवं संयुक्ते घटे भाविगंधग्रहः स्यात्॥
गंधस्यापि स्वग्रहे हेतुत्वात्॥ न च गंधस्य प्रत्यक्षत्वे नेंद्रियसन्निकर्षाश्रयत्वमनुमेयं शब्दप्रत्यक्षहेतोः समवाय-
स्य गंधेपि सत्त्वात्। गंधे इंद्रियसन्निकर्षसाधने च साध्याप्रसिद्धिः॥ मैवं॥ गंधसमवायिसंयोगस्य हेतुत्वे यदि
गंधसमवायस्य विशेषणता तदा स हेतुरेव उपलक्षणत्वेन संयुक्तद्रव्यमात्रमुपलक्ष्यं तथा च घटसंयोगात्प-
टगंधग्रहप्रसंगः स्वसमवायिसंयोगो हेतुस्तु स्वसमवायावच्छेदक इति चेत्॥ तर्हि संयोगिसमवायस्य हेतुत्वे संयोगा-
वच्छेदकः समवायो हेतुरिति तु लभ्यं तदेतत्सरिवत्यक्तोमपरिधानमित्युच्यते॥ अथ संयुक्तसमवायो न संयोगः स-
मवायः उभौ वा॥ गंधेंद्रियवार्त्ते॥ न चेंद्रियेण गंधस्य परंपरासंबंधः परंपरा हि संयोगसमवायावेव तत्र च
विरोध एव नाधिकोपि सिद्धांतादिति चेत्। न॥ इंद्रियत्वसंयोगतदाश्रयत्वसमवायानामेव परंपरासंबंधत्वात्॥
अन्यथा नीलत्वादेः परंपरासंबंधित्वेन वस्त्रवमे केवलघ्वनुगतव्यवहारोच्छेदः॥ ननु संयुक्तसमवेतसम

॥किं०मू० वायावरूपत्वादिग्रहस्तदभावादिति चेन्न॥ तदनभ्युपगमेपि रूपादिसादृश्यस्य ततो ग्रहात्॥ न च द्रव्यसादृश्या-
॥३४॥ देव तद्व्यवहारः बाधकं विना प्रतीत्यविशेषाद्वैपरीत्यापत्तेः॥ आश्रयवैसादृश्येपि रूपरसगंधादेः सादृश्यानुभ-
वाच्च॥ रसत्वमधुरत्वगंधत्वसुरभित्वादिश्च जातिरनुगतप्रत्ययत्वात्॥ रूपे च यद्यपि इदं नीलमिदं पीतमित्याद्य-
नुभवान्नीलं रूपमिदं रूपमिति तथापि नीलो वर्णः पीतो वर्ण इति अनुगतबुद्धिरस्ति रूपत्वमाने॥ न च चक्षुरा-
दिष्वेकमात्रग्राह्यत्वरूपत्वादिकं बाधकं विनानुगतबुद्धेर्जातिविषयत्वात्॥ इंद्रियातींद्रियत्वेन चक्षुराद्यग्रहे
पि रूपत्वादिप्रतीतेश्च न चानुसंहितोपाधेरुपहितप्रत्ययः॥ अतींद्रियरूपप्रसंगाधानानुमानापत्तेः॥ योग्यताया
रूपत्वादिजातिनिरूप्यत्वात्॥ यद्यपि त्वन्मते नीलपीताद्येकैकमेव नित्यं नातींद्रियं तथापि चक्षुरादिरूपस्याली-
कपृथिव्यादिरूपाभिन्नत्वेन प्रत्यक्षत्वप्रसंगः॥ नन्वेवमेरूपमुद्भूतमनुद्भूतं च विरोधात्॥ रूपत्वादीनां परस्पर-
व्यावृत्ततया ज्ञातस्य रूपादेरूपत्वव्याप्तकरणत्वेन परस्परव्यावृत्तैश्चक्षुराद्यनुमितिः परस्परव्यावृत्तत्वं चक्षुरा-
द्यनुमितौ चक्षुर्ग्राह्यत्वादिना रूपादिपरस्परव्यावृत्तधीरित्यन्योन्याश्रयाच्च॥ नीलपीतादिप्रतीतौ भिन्नाभि-
न्नैकरूपासिद्धावपि तत्करणग्राह्यत्वस्य सर्वरूपेष्वसिद्धेः॥ ननु नीलपीताद्युपलब्धिकारणेषु गंधरसस्पर्शा-
व्यंजकत्वे सति नीलादिव्यंजकत्वादालोकवदिति तैजसत्वप्रसाध्य तैजसेंद्रियग्राह्यत्वेन नीलादौ रूपाद्या- ॥हेरंब॥
नुगतधीः॥ एवं गंधादावपीति चेत्॥ एवं प्रनाडीज्ञानाभावेपि रूपरसादावनुगतप्रत्ययात्॥ नीलाकारा ॥३४॥

नुगतबुद्धेश्च नीलत्वं जातिः न च चक्षुर्ग्राह्यत्वं तत्॥ पीतादौ गतत्वात्॥ ननु चैकैका एव नीलपीतादिव्यक्तयः नानाभ-
वो नीलिम्नि मषीभेदेपि तत्त्वेन प्रत्यभिज्ञानात्॥ न चानेकव्यक्तिवृत्तित्वे नित्यत्वे च जातित्वापत्तिः जातेः संस्था-
नमात्रव्याप्यत्वात्॥ अवयवावयविवृत्तित्वात् गोत्वादिना परापरभावानुपपत्तेश्च नीलतरादिप्रतीतिस्तदन्य-
रूपासंभेदादिति चेत् न॥ पाकेन श्यामेन नष्टे रक्तमुत्पन्नमित्यनुभवात्॥ न चासौ भ्रमो बाधकाभावात्॥ न चोत्पा-
दविनाशप्रत्ययस्य समवायो विषयः तदनुल्लेखात्॥ एवं च मधुराम्ललवणकटुतिक्तकषायाणां सौरभासौ-
रभाणां च गंधानामेकैकत्वं स्यात्॥ नीलादितुल्यत्वमस्त्विति चेत्॥ न॥ तेषामुत्पादविनाशानुभवात् एकत्वे
मधुरत्वाद्यनुपपत्तेश्च॥ ननु श्रोत्रे समवायेन शब्दग्रहस्सर्वत्र सर्वशब्द[illegible]पलब्धिः स्यात्॥ न च कर्णशष्कुल्य-
व[illegible]च्छेदेनोत्पन्नो गृह्यते अवच्छेद्यस्याकाशत्वेनाविशेषात्॥ तदन्यत्वे शब्दस्य तत्रासमवायात्॥ तस्माद्यः
शब्दो यं प्रति योग्यः स तेन गृह्यते नान्यः॥ न च पुरुषविशेषप्रतियोग्यत्वं न स्वरूपं अननुगमात् न जातिः॥
तस्या निष्प्रतियोगिकत्वात्॥ न हि गौः॥ किंचित्प्रति गौरिति वाच्यं॥ सप्रतियोगित्वं हि न सावधित्वं दीर्घादिवत्॥
नापि इतरधीनिरूप्यत्वं अभाववत्॥ किंतु शब्दग्रहे सा जातिः कारणं तदवच्छेदिका वा॥ अत एव न कुर्वद्रूपत्वप्र-
संगः॥ सहकारितास्वीकारात्॥ सर्वसाधारणत्वमिष्टमेव सर्वैस्तथा व्यवह्रियमाणत्वात् गत्वादावपि तद्वत्॥

शब्दमात्रस्य योग्यत्वमननुगतमेव गुणयोग्यत्ववदिति मैवं ॥ शब्दस्य प्रत्यक्षत्वे न प्रत्यासत्तिसाधनात् ॥ न च समवायेति प्रसक्तोन्यो नाभ्युपगत इति वाच्यं । कर्णसंयोगावच्छिन्नसमवायस्य प्रत्यासत्तित्वात् कर्णसंयोगो हि समवायवृत्त्या शब्दाधारतायां परिचायक एव चेह शब्दो नेह शब्द इत्यनुभवाच्छब्दस्याव्याप्यवृत्तित्वसिद्धेः यस्य शब्दस्य समवायवृत्त्या आधारता कर्णसंयोगेनावच्छिद्यते संगच्छते यस्य तु न तदत्यन्ताभावेन स न गृह्यते । यथा संयोगस्य समवायेनाधारता हस्तसंयोगेनावच्छिद्यते न तदभावेनेति हस्तसंयोगावच्छेदेन संगृह्यते । नान्यत्र । अन्यथा हस्तसंयोगस्यानवच्छेदकत्वे सर्वमिदं हस्तमिति संयोगस्यापि सर्वत्रोपलब्धिः स्यात् । नन्वेवं समवायेप्यव्याप्यवृत्तिः समवायेन च स्यात्तस्याधारावृत्तित्वात् । अभावस्य विशेषणतया व्याप्यवृत्तिरेव ॥ नन्वेवं सर्वत्र सर्वशब्दोपलब्धिः स्यात् । शब्दसमवायसत्त्वेपि अन्यशब्दात्यन्ताभावसत्त्वात् । अथ वीणादौ शब्द इत्यनुभवात्तदवच्छिन्नेन श्रोत्रेण तु कर्णावच्छिन्नमेव । कर्णे न शब्दः किंतु वीणायामित्यनुभवात् । अन्यथा कर्णे शब्द इति धीः स्यात् । न चानन्तवीणाद्यवच्छेदकत्वेनानन्तश्रोत्रस्य कल्पने गौरवं शब्दे देशत्वेनैवकत्वेतिप्रसंगः स्वदेशानां शब्दावच्छेदकत्वादिति वाच्यं वीणादिदेशताग्रहस्य बाधकं विना प्रमाणत्वे गौरवस्य न्याय्यत्वात् । प्रसृतसर्वतोक्रान्तशब्दसंतानोत्पादक्रमेण कर्णोत्पादे गौरवं । मानाभावात् । न च दूरसंनिधानयोः शब्दानामबाधितत्वात्तारत्वमंदत्वादिवै

धर्म्यप्रत्यक्षतोतीभेदसिद्धेः सन्तानसिद्धिः दूरत्वादिदोषात्तरत्वाग्रहे मंदत्वारोपात्तदुपपत्तेः । व्यवहितकर्णे शब्दानुत्पादश्चाव्यवहितशब्दस्यानुपलब्धिर्निमित्तवायुसंयोगाभावात् । ननु व्यवधानाभावस्य हेतुत्वात् । तस्य संनिध्यपेक्षित्वात् । कर्णानुपघातेपि हेतुरिति न तदुपघाते शब्दग्रह इति ॥ मैवम् ॥ कर्णावच्छेदेनापि शब्दग्रहात् कर्णे शब्द अवच्छेदिके इति कर्णावच्छिन्नमेव नेतः श्रोत्रस्य आवश्यकत्वाच्छब्दमात्रग्रहे तदनुविधानात् । साक्षात्प्रतीतिसाधनस्य शरीरसंयुक्तस्य सत इंद्रियत्वात् । कर्णेन वीणाशब्दं शृणोमीति । तत्करणत्वेनाबाधितानुभवाच्च । न तु वीणादिकमनंतत्वात् ॥ शब्दमात्रग्रहे तदनुविधानात् । वीणाद्यवच्छिन्नस्य नभसः शरीरासंयुक्तत्वेनानिंद्रियत्वात् । वीणायाः शब्दं शृणोमीत्यनुभवाच्च । कथं तर्हि वीणायां शब्द इति ज्ञानं श्रूयमाणशब्दस्य तदनधिकरणत्वादिति चेत् । नहि सर्वत्र शब्दे मृदंगाद्यधिकरणत्वग्रहनियमः । अन्यथा क्वचिदपि शब्दे संदेहविपर्ययतदनुल्लेखानामनुपपत्तिः । यत्र प्राप्तिस्तत्र शरीरे सुखमितिवत् तदुत्पत्तये परंपरया वीणाद्यपेक्षणात्तदधिकरणत्वेन तथापि वीणायाः शब्दानामपत्वेन तथैवाधिकरणत्वात् । नन्वेवं कर्णे नैकगकारोत्पादे नैकगकारग्रहप्रसंगः । नन्वेकग्रहे अन्यग्रहसामग्रीप्रतिबंधका कोलाहले तथा दर्शनादिति चेन्न । तारेणामंदस्याभिभवात् । तुल्यत्वे चानेकग्रहस्येष्टत्वात् । सदृशग्रहस्त्वसंतसारूप्यात् । एवं च वीणादेः श्रोत्रत्वे मैणग्रहमनुवाकमध्यापितो यद्दात हयाश्रुतं तेन्मय पीसादिप्रतीतीनां तदुच्चारणादिप्रयोज्यजातीयत्वे विषयः शब्दे हि कारणविशेषप्रयोज्या जातिरवश्यं वाच्या । अन्यथा शब्दविशेषेण पुत्राद्यनुमानं न स्यात् । जातिं विना विशेषांतराभावात् । एवं च कर्णावच्छिन्नस्य नभसः श्रोत्रत्वे न

॥चिं०मू०॥ वीणादिप्रभवशब्दग्रहो न तत्र संतानक्रमेणोत्पादं विना । यन्न न्यग्गतिकतया न तु कलम नापि प्राप्तिरिति शब्देन च नाव्यवहित
॥३६॥ परमाणुदेशोत्पादक्रमेण शब्दारम्भायेन मेघादिशब्दानामभिलोकप्राप्तियुगान्तरेऽपि न स्यात् ॥ किंतु मेघाद्यभिहतसर्व
तोगामिमहावायोर्महति देशे संयोगनिमित्तमभ्यस्य घशब्देन सर्वदिग्गतौ शब्द एक एव जन्यते निमित्तसंयोगानुरोधि
त्वाद्धि कार्याणां उत्तरोत्तरेण प्रोद्भूताधिकदेशतः सर्वत एकैक एव शब्द उत्पद्यते वीचीतरंगवदुत्पाद्यते अत एव सर्वे
के शब्दग्रहः वायोश्च नयनवन्महावेगतया शीघ्रगामित्वेनाग्निभशब्दोऽस्मादाद्यशब्दानेनरमं चिरेणैव शब्दोपलम्भः
वायोरेव मन्दतमादिक्रमेण मंदादिशब्दोत्पत्तिः । यद्वा घशब्देन कदम्बगोलकवद्दशदिशि दश शब्दा उत्पाद्यन्ते तेऽपर
शब्दशब्दसंतानारंभ इति । नन्वेकशब्देन कथमनेकशब्दारम्भः सामग्र्यभेदादिति चेत् न । सर्वतोऽनेकवाय्वादिसहकारात् ॥
प्रागभावभेदाद्वान्ते तदितरहेतुसाकल्ये तद्दानकार्यभेदस्तथा अदर्शनादिति वाच्यं कार्यभेदो हि सामग्रीभेदाव
सेयोऽहत्वं तरभेदादिव प्रागभावभेदादपि । अन्यथा समवायादिभेदेऽपि कार्यैक्ये जायेत न स्यात् । घटव्यक्तिषु तथाऽदर्शनात् ॥
पाकजे रूपादौ हेतुत्वं तत्र भेदेऽपि प्रागभावपूर्वरूपादिध्वंसभेदेन भेदात् । अपृथग्रूपादौ चैकप्रागभावप्रध्वंसयोः सर्वत्र तुल्य
त्वात् किं विनिगमकं । गन्धादिप्रागभावानां रसादौ व्यभिचारापि गन्धादौ रसादिप्रागभावानामव्यभिचारादिति चेत् न वायु
स्पर्शे गन्धरूपरसप्रागभावध्वंसानां तेजोरूपे गन्धरसाभावयोः जलरसे गन्धप्रागभावस्य व्यभिचारेण तुल्यत्वप्रागभा
वहेतुतायाः आवश्यकत्वात् । पाकजेषु रसरूपस्पर्शेषु गन्धादिप्रागभावानामन्यथासिद्धत्वात् । रूपादिषु तथा कल्पनात् ॥ हेरंब॥
गन्धेऽपि स्वप्रागभावस्यावश्यकहेतुत्वात् । अभावान्तराणामन्यथासिद्धत्वे । यद्वा रूपरसस्पर्शतुल्यत्वेऽप्यग्निसंयोगविशेषा ॥३६॥

त्कचित्सौरभ्यसौरस्यमेवोत्पद्यते । न चाग्निसंयोगो रूपादिमात्रे कारणं व्यभिचारात् । एवं रसादावपि ॥ ननु कार्यमात्रे प्राग
भावमात्रं न हेतुः तयोर्व्यतिरेककालानवगमात् । सर्वे मुक्ताविततरहेतुत्वाभावादेव कार्यानुत्पादादिति चेन्न । हेत्वन्तरसत्वे
ऽप्युत्पन्ने तु स्वनेरूपादेन प्रागभावस्य हेतुत्वात् । एको सामग्र्येवकमेकं कार्यं जनयति स्वभावादिति चेन्न । कार्यानुत्पादस्य
सामग्रीविरहप्रयोज्यत्वनियमात् । नेत्र कार्यं सहस्रावेन कारणत्वं गौरवात् । न च विनश्यद्वस्तु समवायिनि कार्या
नुदयात् तथात्वमिति वाच्यं तत्त्वता समवायिकारणस्य च तथात्वात् । कारणमात्रमानाभावेन तस्य प्रयोजकत्वात् ।
ननु समवेतसमवायेन ग्राहकं शब्दत्वादिजातेरभावादिति चेन्न । रूपत्वादिन्यायेन तत्साधनात् । ननु समवा
यासिद्धेर्न सा प्रत्यासत्तिः । विप्रतिपत्तिश्च शुक्लः पट इति प्रतीतिर्विशेषणविशेष्यसंबन्धविषया न वेति । अथ गुण
क्रियाजातिनद्धतो मिथः संबद्धावनुभूयेते । नेष संबन्धः स्वरूपद्वये विशिष्टधीव्यपदेशाविति चेन्न न । संबन्धी नु
भवे संबन्धो हि न विशेषणं भासते तस्य प्रथममज्ञानात् । संयुक्ताविमाविति वत् समवायिनाविति अननुभवात् । नापि
विशेष्यः अनयोः समवाय इत्यननुभवात् । नापि स्वरूपेण भासते । समवायजानामिति विषयत्वाननुभवात् । ननु नी
लो घट इत्यनुभवो विशेषणविशेष्यसंबन्धविषयकः विशिष्टप्रतीतित्वात् दण्डीति ज्ञानवदिति चेन्न न । अघटं
भूतलमिति ज्ञाने मिश्रकृते चेत्यत्र व्यभिचारात् संबन्धविषयत्वे बाधकं विनेति विशेषणमिति चेत् न । बाधकाभा
वस्यैव सामर्थ्यविशेषाद्व्याप्यत्वात् । साधकाभावेन सत्सप्रतिपक्षत्वाच्च बाधकाभावस्य साधकत्वे साधकाभा
वस्य बाधकत्वात् । तस्मादुभयाभावेन संशयः स्यात् । न च प्रतीतिरेव समवायसाधिका । तस्यास्तद्विषयत्वासिद्धेः ॥

॥विं०मू० अन्यथाअन्योन्याश्रयात्‌।अघटंभूतलंज्ञातमित्यादिरपिविशिष्टधीःसंबंधविषयीकिंतुभ्रांताबाधकसत्वादि
॥३७॥ तिचेत्‌।तर्हिभूतलेअघटत्वस्यज्ञातत्वादेश्चाभावःस्यात्‌।तथाचव्यवहारविरोधः।संबंधश्चनसंयोगःसमवायः
संयोगसमवायान्यतरोवाबाधादसिद्धेः।नापिसंबंधमात्रंज्ञापकत्वादिनासिद्धसाधनात्‌।नाप्यविशिष्टव्यावृत्तवि
शिष्टज्ञाननियामकः।अभावज्ञानादाविवस्वरूपसंबंधेनार्थांतरत्वात्‌।नचसंबंधिभिन्नत्वेसाध्येविशेषणेअ
भावादिनाव्यभिचारात्‌।बाधकाभावस्यचहेतौविशेषणत्वेनास्त्येव।विनापिभिन्नसंबंधमभावज्ञानादावि
वविशिष्टधीसंभवेनाप्रयोजकत्वाच्च।विशेषणताविशेषरूपःप्रकारादिकृतोवाविशेषःसंबंधोविषयत्वोपलक्षः।
स्यादेतत्‌।अवयविगुणक्रियाजातितद्वतामिहतंतुषुपटः[illegible]चलनंपटत्वंचेतीहप्रत्ययआधाराधेयसं
बंधनिमित्तकः।यथार्थप्रत्ययत्वात्‌।इहकुंडेबदराणीतिप्रत्ययवदितिचेत्‌।नइहभूतलेघटाभावोज्ञातमित्यादौ
व्यभिचारात्‌।बाधकंविनेत्यस्यस्वनिरस्तत्वात्‌।तथैवाधाराधेयभावोपपत्तेः।उत्पन्नपरिस्थितयत्नप्रत्ययेनापेक्षणीय
स्याधारत्वात्‌।अन्येतुशब्दजातिरूपादिरिंद्रियसंबंधःप्रत्यक्षत्वात्‌।घटवदित्यनुमानात्संयोगबाधेइंद्रियसंबद्ध
घटवत्त्वात्समवायसिद्धिः।इंद्रियस्यसंबद्धग्राहकत्वात्‌।अतएवसमवायोनप्रत्यक्षःइंद्रियेणासंबंधात्‌।नचसंब
धत्वेनतत्सिद्धिःअनवस्थानात्‌।स्वभावादेवज्ञानवत्स्वसंबद्धव्यवहारकारित्वाच्चसमवायोहिसंबंधंविनैवरूपा
दिवत्स्यादिति।नचजात्यादेरपिस्वभावादेवस्वस्वसंबद्धव्यवहारकारित्वेनसमवायविलोपः।जात्यादेरिंद्रिया ॥हेरंब॥
संबद्धत्वेसमवायवदप्रत्यक्षत्वापातादिति।तन्न।समवायस्याबाधेपिस्वरूपसंबंधस्यावश्यकत्वात्‌।घटज्ञानयोर्भूतला ॥३७॥

भावयोरिवद्रव्येनगुणजात्यादिभिःस्वरूपमेवसंबंधोस्तु।तथाचशब्दस्येंद्रियविशेषणतयारूपजात्यादेरिंद्रियसंबद्ध
विशेषणतयारूपत्वादेरिंद्रियसंबद्धसंबद्धविशेषणतयास्वभावसंबद्धरूपयाग्रहणसंभवेकिंसमवायेन।द्रव्येस्वभा
वसंबंधान्नेंद्रियग्रहणमितिकथंगुणादेस्तेनग्रहणमितिचेत्‌।नसमवायेनापिनद्रव्यग्रहइतितुल्यं।अपरेत्वामपाक
दशायामेवघटेक्रमेणश्यामरक्तरूपोपलब्धिरस्ति।सानतदुभयनिबंधनारूपस्यनित्यत्वेनैकदोपलंभापत्तेः॥
तस्मा नित्यत्वादेवतयोर्नोत्पादविनाशौतयोःसंबंधस्यतूत्पादनाशौसएवसमवायइतितन्न।श्यामेनष्टेरक्तमुत्पन्नमि
तिसंबंधितानुभवात्समवायस्योत्पादविनाशानुकूलत्वान्नत्वमेतत्स्यातींद्रियत्वाच्च।अन्यथावयविज्ञानगंध
रसादेरपिनित्यत्वंसमवायस्यैवोत्पत्तिविनाशावितिकिंनबाधयेः।नह्युत्पादविनाशप्रतीतिरप्रमाणिकी।बा
धकंविनेति।उच्यते।गुणक्रियाजातिविशिष्टबुद्धयोविशेषणविशेष्यसंबंधविषयाःविशिष्टबुद्धित्वात्‌।दंडी
तिबुद्धिवत्‌।नचव्यभिचारःअभावादिविशिष्टबुद्धेरपिस्वरूपसंबंधविषयत्वात्‌।नचैवमत्रापितेनार्थांतरम्‌
यतोगुणक्रियाजातिविशिष्टबुद्धीनांपक्षधर्मताबलेनविषयःसंबंधःसिध्यन्लाघवादेकएवसिध्यतीतिसमवायःनतु सएव
स्वरूपसंबंधःतत्रस्वरूपाणामनेकत्वात्‌।संबंधत्वेनक्लृप्तत्वाच्च।अथवाविशेषणसंबंधनिमित्तकाइतिसाध्यहेतौच
सत्यत्वेविशेषणविशेष्यसंबंधकारणत्वेनैकएवसिध्यतिलाघवात्‌।अनुगतकार्यस्यानुगतकारणनियम्य
त्वाच्चनस्वरूपसंबंधस्तेषामननुगमादननुगतत्वाच्च।नचोभयमप्यप्रयोजकंविशिष्टसाक्षात्कारस्यसंबंधाविषय
त्वेतदजन्यत्वेवागवाश्वादावपिविशिष्टबुद्धिप्रसंगात्‌।नव्यास्तुगुणक्रियाजातिविशिष्टबुद्धिःसंबंधभिन्नविशे

॥न्वि०मु० षणसंबंधविषयानिर्विषयभावविशेषणकविशिष्टबुद्धित्वात् । इतरानिरूपणानिरूप्यविशेषणकविशिष्टबुद्धित्वाद्वा ।
॥३८॥ अतोनाभावादिवादिविशिष्टबुद्धौ व्यभिचारः । न चाप्रयोजकत्वं निरुपाधिसंबंधव्याप्तिकत्वात् । संबंधश्चाविशिष्टत्वावत्तो
विशिष्टधीनियामकः यद्वा इंद्रियप्रत्यासत्तित्वेन तत्सिद्धिः । तथाहि गुणक्रियाजातिसाक्षात्कार इंद्रियसंबंधसाध्यः
जन्यप्रत्यक्षत्वादित्यतः साक्षात्संबंधबाधे कारणत्वेनेंद्रियसंयुक्ते घटे संबंधः सिध्यन्नुपक्षधर्मताबलाल्लाघ
वेनानुगतः समवाय एव एवं सिध्यति । अनुगतकारणजन्यत्वादनुगतकार्यस्य न तु संयुक्तविशेषणतारूपः स्वरूपसं
बंधस्तस्य तत्तद्रूपादिरूपत्वेनाननुगतत्वात् । एवं रूपत्वरसत्वसाक्षात्कारेपि कारणत्वेनेंद्रियसंबंधः समवाय
एक एव सिध्यति लाघवात् । नत्विंद्रियसंबद्धविशेषणविशेषणता । तस्या रूपत्वादिरूपत्वेनाननुगतत्वात् । अत ए
व संयोगो विशेषणता च प्रत्यासत्तिरस्तु न तु समवायादिचतुष्टयमिति निरस्तं । तस्यास्तत्तद्रूपत्वेनाननुगतत्वात्
संबंधत्वेनाप्यनुगतत्वे समवायप्रत्यक्षता संबंधेंद्रियप्रत्यक्षत्वात् । नन्वेवमभावविशिष्टप्रत्यक्षेपि विशिष्टबु
द्धित्वात्संयोगसमवायबाधेऽनुगतवैशिष्ट्यसंबंधोपि विषयो निमित्तं वा भवेदिति चेत् । तस्य हि समवायवदेकत्वे घटा
भाववति पटवति पटाभावधीप्रसंगः । घटाभाववैशिष्ट्यमेव हि पटाभाववैशिष्ट्यं पटाभाववैशिष्ट्यसत्वेपि पटाभावोना
स्ति तस्य तनोभिन्नत्वादिति चेत् । पटाभावाभावस्याभावत्वे सोपि वैशिष्ट्येन संबंधेन तत्रास्ति वैशिष्ट्यस्यैकत्वात् । मु०॥
पटाभावाभावस्याभावत्वे पट एव प्रतिबंधको वाच्यः एवं घटाभावः पटाभावधीहेतुः स्यात् । पटाभावस्तु वैशिष्ट्येन तत्र
स्वावैशिष्ट्यस्य प्रत्यभावव्याप्तिनानात्वे चाभावविशिष्टबुद्धौ नैकसंबंधः कारणं विषयो वेति तत्तदभावस्वरूपप्र ॥३८॥

४

त्यक्षेनानुगतमेव वैशिष्ट्यं विषयः कारणं च वाच्यं तथाचाननुगततत्तद्रूपाविशेषणतैवास्तु क्लृप्तत्वात् । किमनंतवैशि
ष्ट्येन । समवायस्य वैशिष्ट्यस्य च प्रत्यक्षत्वे त्वयापींद्रियसंबंधविशेषणतास्वीकारात् ॥ ननु समवायस्यैकत्वे
धरूपिनीरूपिव्यवस्था । घटेन सह रूपसंबंधरूपत्वसमवायस्य न वाय्वादिनेति चेत् । न रूपसंबंधनिरूपत्व
हि समवायस्य स्वरूपमेव यदि तदा रससंबंधरूपत्वेन स्यात् तयोर्विरोधात् । अन्यच्च दुर्वचं निमित्तं चेत् । उच्यते । वा
यो रूपसमवायेपि रूपात्यंताभावोस्ति न घटे तथमेवमधिकरणस्वभावात् । अबाधितरूपिनिरूपप्रतीतेश्च ॥ न
न्वेवं ज्ञातो घट इति प्रतीतेर्ज्ञाततापि स्यात् । वर्तमाने बाधकाभावात् । अतीतानागतयोस्तु न हि प्रतीतेति चेत् । न ॥
अतीतानागतयोर्ज्ञाततया अभावे व्यवहाराभावापत्तेः । तस्य ज्ञाततासाध्यत्वात् । न च ज्ञातता ज्ञानमेव व्यवहारहेतुः ॥
गौरवात् । अतीतादौ ज्ञानं तद्विषयावच्छिन्नताधीगोचरमिति चेत् । तर्हि वर्तमानेपि तावेव तद्विषयो न घटतीति वर्त
माने यो ज्ञातता प्रतीतिविषयो वैलक्षण्यमीक्षामहे ॥ ननु रूपघटयोर्न समवायः किंत्वभेदः दंडीपुरुष इत्यत्र दंडिपु
रुषयोरिव नीलघटयोरप्यबाधिताभेदानुभवात् ॥ नीलो घटो दंडी पुरुष इति प्रतीत्योर्विशेषणसंबंधमात्रगोच
रत्वे नीलो घट इति च दंडः पुरुषो दंडी पुरुष इतिवन्नीलो घट इत्यपि स्यात् । तस्मादेकत्र भेदो विषयोऽपरत्र विशेषणसं
बंधः द्विषयत्वेव धियां विशेषात् । अथवा विशेषणताविशेष्यतावच्छेदकयोर्नीलत्वघटत्वयोरेकवृत्तित्वज्ञायते
३।८ दंडित्वपुरुषत्वयोरिव पुरुषे । एवं नीलघटपदयोरपि सामानाधिकरण्यमुपपद्यते नीलत्वघटत्वाभ्यामभिन्नप्र

॥खं०म०प्र०
॥३९॥

त्तिनिमित्ताभ्यांतयोरेकत्रवृत्तेः नचमतुब्लोपादभेदोपचाराद्वानीलपदंनीलवत्परमितिवाच्यं॥नहिप्रयोगंसाधयंब्रूमः॥किंतु
घटनीलयोरभेदप्रतीतिं॥पदेपिनोपचारादिकल्पनागौरवात्मुख्यबाधकाभावाच्च॥उच्यते॥शुक्लघटशब्दयोरेकार्थत्वेघ
टःकुंभइतिवत्शुक्लःपटइतिसहप्रयोगानुपपत्तिःस्यात्॥अंधस्यपटग्रहवद्रूपग्रहोरूपाग्रहवत्पटाग्रहोपिस्यात्॥महारजत
रक्तेपटग्रहवत्शुक्लाग्रहवत्पटाग्रहोपिभवेत्॥पटमानयेत्युक्तेयंकंचित्॥शुक्लमानयेत्अपटःपटइतिवदशुक्लःपटइतिसह
प्रयोगोविरुध्येतपटशुक्लयोरभेदात्अग्निसंयोगादेकत्रश्यामरक्तयोर्विनाशोत्पादेघटस्यतौस्यातांघटसत्वेवातयोरपि
तौनस्यातां॥अथशुक्लत्वादीनांद्रव्यभेदेनभेदात्तद्बोधार्थेसहप्रयोगः॥अंधादिनाशुक्लादिग्रहेशुक्लत्वादीनामग्रहउ
पपद्यते॥शुक्लत्वादिजातेश्चद्रव्येणनाभेदोनवासमवायःकिंतुस्वरूपसंबंधइतिचेत्न॥शुक्लत्वमधुरत्वसुरभित्वा
दीनांद्रव्यवृत्तित्वेद्रव्यग्राहकत्वगादिभिर्ग्रहप्रसंगात्॥रूपत्वादीनांप्रतिनियतेंद्रियग्राह्यत्वान्नैवमितिचेत्न॥रूपत्वा
दीनांद्रव्यवृत्तित्वेप्रतिप्रतिनियतेंद्रियग्राह्यत्वेवनस्यात्॥योग्यवृत्तित्वेनजातिग्रहेणयोग्यत्वात्तत्तज्जातित्वेनयो
ग्यत्वेऽननुगमात्॥तस्माद्रूपत्वादीनांप्रतिनियतेंद्रियग्राह्यतापिगुणगुणिभेदेप्रमाणं॥अभेदेचकथंपटस्यशुक्लरू
पमितिभेदबुद्धिःपर्यनीलिमेतिबुद्धिप्रसंगश्च॥नचैकांताभेदसत्वमिदंदूषणंवयंतुभेदाभेदवादिनः॥तथाचभेदप्र
दायापौनरुक्त्यादिभेदाभेदनौक्रमेणप्रमाणंप्रत्यक्षमथवाभयसिद्धौसामानाधिकरण्यधीरभेदप्रमाणं॥यद्वा
अत्यंतभेदेअभेदेचनसामानाधिकरण्यधीःप्रमाणं॥इतितयैवभेदाभेदसिद्धिः॥नचभेदाभेदयोःपरस्परविरहरू ॥हेरंब॥
पतयाविरुद्धयोःकथमेकत्रसमावेशइतिवाच्यं॥संयोगतदभावयोरिवाविरोधात्॥पाकानंतररक्तोयंनश्यामइत्य ॥३९॥

बाधितानुभवबलात्तत्रैवतदन्योन्याभावसिद्धेस्तथापिभेदाभेदस्वीकारात्॥अन्योन्याभावत्वमप्यव्याप्यवृत्तिवृत्ति
नित्याभाववृत्त्यभावत्वसाक्षाद्व्याप्यत्वेधर्मत्वात्॥अत्यंताभावत्ववत्॥नित्यतिवानविशेषणंअव्याप्यवृत्तिप्रतियोगिकसंसर्गाभा
वयोस्तयोरप्यव्याप्यवृत्तित्वादित्यतोपिभेदाभेदसिद्धिः॥उच्यते॥तस्यैवतत्राभाववच्छेदकभेदेनवर्ततेज्ञायतेचयथासंयोगा
त्यंताभावःश्यामावच्छिन्नस्यतस्यैवान्योन्याभावस्तत्रैवरक्तावच्छिन्नेतदन्योन्याभावस्याभावच्छेदेनतद्वदिहापिनी
लस्यान्योन्याभावोघटत्वावच्छेदेनेतिनीलाद्घटस्यभेदोस्तुअभेदस्तुनीलान्योन्याभावाभावरूपोनघटेघटत्वाव
च्छेदेनैवविरोधात्॥एकावच्छेदेनभावाभावयोरेकत्रावृत्तेरज्ञानाच्च॥तथावच्छेदांतरेणघटत्वावच्छिन्नेघटेतदसंभवात्।
तदज्ञानेपिनीलोघटइत्यनुभवाच्च॥नचान्योन्याभावरूपोभेदोस्तुअभेदस्तुनभेदाभावःकिंत्वन्यएवेतिवाच्यं॥अभेद
व्यवहारेतस्याहेतुत्वात्॥तस्मान्नीलोघटइत्यत्रनीलसंबंधएवावभासते।तथासतिनीलाघटइतिधीःस्यात्इत्युक्त
मितिचेत्नीलोघटइत्यत्रत्वयायदिनीलसंबंधविषयत्वमापद्यतेतदिष्यतएव॥अथनीलोघटइतिप्रयोगेसंबंधेवा
चकपदत्वेतदपीष्यतएवमतुब्लोपादभेदोपचाराद्वानीलपदमेवनीलवत्परमिति॥ननुशब्दरूपादिग्रहेविशेषण
ताइंद्रियसंबंधविशेषणतावश्यंहिक्लृप्तास्तुकिंसमवायादिना॥अथविशेषणतायांसमवायइंद्रियसंबद्धेहिविशेषणता
यावत्संयुक्तसमवायादिरूपजीव्यस्तैर्विनातयाभावादितित्वेत्विशेषणतास्वरूपतेषामुपजीव्यत्व॥ननु प्रत्यः
सत्तित्वेतैर्विनापिसमवायाभावयोर्विशेषणतासत्वात्संयुक्तसमवायादिरपितत्रास्तीतिचेत्आसत्ताननुसाप्र
त्यासत्तिः॥किंतुविशेषणतैवक्लृप्तत्वात्॥संयुक्तसमवायादिकंविनाविशेषणतामपादानंज्ञायतइतिचेत्न।मानाभावा॥

वि० मु० प्र०
॥४०॥

नहि सा प्रत्यासत्तिर्ज्ञाता अपि तु स्वरूपसतीति । मैवम् ॥ शब्दादीनां साक्षात्कारविषयत्वेनेन्द्रियसंबंधानुमितौ श
ब्दादेः समवाय्यादिकं ज्ञात्वैव विशेषणताग्रहइस्य वस्य प्रथममेवोपस्थितत्वात् ॥ समवायादिरेव विषयो न विशेष
णतान्वमो रूपक्षितत्वात् ॥ नन्वभावग्रहेणेन्द्रियसंबद्धविशेषणताप्रत्यासत्तिः चक्षुःसंयुक्ते परमाणौ योग्यस्य
जलत्वादेरभावाग्रहप्रसंगात् ॥ किं तु स्वग्राह्यसंबद्धविशेषणता ॥ महति वायावुद्भूतरूपाभावस्य कुसुमसौरभाभाव
ता स्य गुडे तिक्ताभावस्य न चक्षुरादिना ग्रहः । अपि तु योग्यानुपलब्ध्या सोऽनुमीयत इन्द्रियविशेषणतापि न प्रत्यासत्तिः
चक्षुरादिना स्वविशेषणजलत्वाद्यभावग्रहप्रसंगात् ॥ यदि शब्दाभावप्रत्यक्षस्तदा प्रत्यासत्त्यंतरं कल्प्यतां तदभावोऽत्रप्र
क्ष एव न भवतीति चेन्न ॥ मैवं ॥ लाघवादिन्द्रियसंबद्धविशेषणतैव प्रत्यासत्तिः ॥ नन्वेवं परमाणौ जलत्वाभावग्रहप्रसंगः । तत्र हि
यत्सत्त्वमनुपलब्धिविरोधि तत्तु तदभाव इन्द्रियसन्निकर्षेण गृह्यते ॥ न च परमाणौ जलत्वसत्त्वमनुपलब्धिविरोधि योग्य
संयुक्तसमवायाभावे न पृथिवीत्ववदनुपलब्ध्यसंभवात् ॥ महति वाय्वादौ वोद्भूतरूपाद्यभावश्चक्षुरादिग्राह्य एव तत्रो
द्भूतरूपादिसत्त्वेऽनुपलंभानुपपत्तेः ॥ अत एव स्तंभे पिशाचवत्तादात्म्याभावः प्रत्यक्षः स्तंभतादात्म्यस्य स्तंभस्येवानुपल
ब्ध्यसंभवात् ॥ एवं शब्दस्याप्यभावः प्रत्यक्षः तदा तत्र शब्दसत्त्वस्यानुपलब्धिविरोधित्वादिति । तत्रेन्द्रियविशेषणतैव प्र
त्यासत्तिः ॥ ~~किंतु समवायसम्बन्ध~~ चक्षुषि जलत्वादिसत्त्वे चानुपलब्धिविरोधीति चेन्न ॥ चक्षुषा न तत्र तद्ग्रहः ॥ नन्वभाव
न विशेषणता प्रत्यासत्तिः ॥ किं तु समवाय एव समवायसंबंधविशिष्टप्रतीतेरविशेषात् ॥ नन्वसमवेतत्वे तस्याभाव
त्वापत्तिः ॥ भावस्य तत्त्वे अभावत्वापत्तिरिति वैपरीत्यसंभवात् ॥ रूपादौ प्रत्यासत्तित्वेन समवायकल्पनं रूपत्वादि ॥हरेरा:
दिविशेषणतायाः प्रत्यासत्तित्वे ठायकनया भावे अपि स्यादित्याह ॥ विशेषणतायेति ॥ टीपैः ॥ अभावेपि तु त्वं ॥ विशे ॥४०॥

षणतापि तु त्वाय प्रागभावप्रध्वंसौ प्रतियोग्याश्रयनाशजन्यध्वंसो देशे काले वा समवैतीति । तत्रैव निरूपणात् । तन्नाश
प्रागभावानधिकरणकालस्य तदधिकरणत्वनियमात् । न च समवायिनाशाध्वंसनाशः घटोन्मज्जनप्रसंगात् ॥
भावत्वस्योपाधित्वात् ॥ अन्यथा तत्रापि तस्य जन्यत्वेन नाशापत्तिः ॥ अथैवमन्योन्याभावात्यंताभावयोर्नित्यत्वेऽनेक
समवेतत्वेन जातित्वप्रसंगः ॥ न च तत्र भावत्वं तत्र गौरवात् ॥ न चाभावानां विशिष्टप्रतीतौ विशेषायेनात्र समवा
यपरिशाग इति चेन्न ॥ घटत्वाभावादेर्जातित्वे सत्त्वद्रव्यत्वपृथिवीत्वादिना परापरभावानुपपत्तेः ॥ तेषां व्याप्यत्वे
घटे तदभावप्रसंगः ॥ व्यापकत्वे सामान्यादौ घटत्वाभावो न स्यादिति ॥ उच्यते ॥ समवेतस्य ध्वंसस्य समवायिका
रणनाशान्नाशः स्यात् । न च नाशत्वे भावत्वं तत्र गौरवात् ॥ प्रागभावे तदभावाच्च ॥ असमवेतत्वेन ध्वंसस्य जन्य
त्वेऽपि न नाशः ॥ आश्रयनाशादेरभावात् ॥ समवेतत्वेऽपि घटोन्मज्जनापत्तेर्न नश्यतीति चेन्न ॥ न नाशे हि प्रयोजन
स्ति भयेन न कार्यमर्जयति सामग्री ॥ तस्मादुन्मज्जनाभावनिर्वाहकध्वंसस्यासमवेतत्वकल्पना ॥ स्वसमवा
यिनाशाध्वंसपरंपरावत्त्वेन च घटकपालादेरपि परमाणुनाशाच्च घटादिध्वंसविरोधी चरमो ध्वंसः परमाणु
वृत्तिः स्यात् ॥ तथा च न प्रत्यक्षः घटध्वंसस्य कपालसमवेतत्वे च नाशत्वेन निरूपणं स्यात् उभयसमवेतत्वम् ।
स्यपरतिरिक्तत्वं कपालं विना न निरूप्यते ॥ नन्वभावग्रहो नेन्द्रियात् किं तु योग्यानुपलब्धेः । तदुपलंभतदभा
वाग्रहात् ॥ न चैवमभावव्यवहारस्याभावानुपलब्धेरेव नेन्द्रियादिति वाच्यं । तत्रावग्रहेन्द्रियानुविधानात् ॥ अ
न्यथा मीलिताक्षस्यापि घटाभावोपलब्ध्या घटधीप्रसंगः ॥ अत एव भावग्रहे भावानुपलब्धेः प

॥चिं०म०प्र०॥ छलग्नानहेतुःइंद्रियेणान्यथासिद्धत्वात्।नहींद्रियार्थसन्निकर्षंतंविनाभावधीविलंबः॥अभावग्रहणींद्रियंहे
॥४१॥ तुस्तदनुविधानादितिचेत्न॥अत्रावुनचक्षुरादेःप्राप्यभावनाश्रयग्रहेतदुपक्षयपात्।अथाधिकरणधीरिंद्रियव्यापारोन
चेतयातदन्यथासिद्धअन्यथासन्निकर्षोपक्षीणतयेंद्रियमपिनहेतुस्यादितिचेत्न।हेतुत्वेसिद्धतद्व्यापारत्वतदेवनास्तिप्राप्य
भावात्।एतेनाधिकरणग्रहेंद्रिययोःपृथगन्वयव्यतिरेकाद्दंडचक्रयोरिवहेतुत्वद्वयोरितिनिरस्तं।अप्राप्यकेनाभावाग्राहकत्वात्मा
नचेंद्रियंप्राप्तिविशेषणमप्राप्तमपिगृह्णातिसंयुक्तसमवायाद्युच्छेदप्रसंगात्।नचसमवायेनतत्कल्पनंतस्यानभ्युपगमात्तत्तु
एवातींद्रियत्वाद्वा॥अयाभावस्येंद्रियग्राह्यत्वेनसंयोगादिवाधेइहैवसावलम्यतां।प्राप्तेचेन्नगताप्राप्तदउस्यापिग्रहप्रसंगात्।इंद्रि
यस्य ग्रहणप्रसंगात्॥इंद्रियस्यापिप्राप्यग्राहकत्वाच्च।नचविशेषणताप्राप्तिः॥अन्यत्रतदकल्पनात्॥रूपादौतद्रूपेसंयुक्त
समवायादिरिवेतिचेत्न।तत्रान्यथानुपक्षीणेंद्रियानुविधानात्तथैव त्वाश्रयगृहवत्तदुपक्षीणलाघवात्।ननुप्राप्ततत्कल्प
नमगौरवात्॥अन्यथात्वगनुविधानाद्रूपंविनापिवायुधीःप्रत्यक्षेतिसानेस्पर्शग्रहउपक्षीयेत॥किंचविशेषणतापामिंद्रि
यग्राह्यत्वंतेनसंयोगस्यान्योन्याश्रयः॥अपिच॥विशेषणताग्राह्यस्वरूपमेवनत्वगादौस्वरूपसंबंधोहेतुःकिंतुयथायथंसंयोगस
मवायौ।नन्वेतयोरन्योन्यव्याप्तिचादिंद्रियसंबद्धग्रहणेतौस्वव्याप्ताविति वाच्यं॥दृष्टांतेहिसंबंधगतःसंबंधोहेतुर्गृहीतःच
क्षुष्यप्यन्यत्रतथाननुग्राह्यस्वरूपं॥संबंधस्यसंबंधिभिन्नत्वानियमात्॥नहिसएवतद्वास्तेनैवभवति॥स्वरूपसंबंधस्य
हेतुत्वेचरूपादिग्रहोपितत एवास्त्विकिंसमवायादिना॥अतःसंयोगविशेषणतेएवप्रत्यासत्तीइतिषोढाकीर्तनमपिविफलं॥ हेरंब॥
एतेनआलोकापेक्षणेचक्षुरपेक्षाचस्यात्तस्यतदेकसहकारित्वादितिनिरस्तं॥प्राप्तिविनाचक्षुषोऽहेतुत्वात्॥आ ॥४१॥

द्रव्यस्यसतपीतस्यानुपलब्ध्याअभावग्रहप्रसंगः॥३

आलोकस्यचप्रतियोगिग्राहकत्वेनयोग्यत्वाघटकतयाअभावग्राहकत्वात्॥नचैवंप्रतियोग्युपलंभकत्वेनचक्षुरपिहेतुःएवं
हितस्तद्व्याप्यतरयावातदुपलंभकसमवधानेतदनुपलब्धेर्ग्राहिकेतिवाच्यं।व्याप्तिंविनातस्याहेतुत्वेनाश्रयग्रहोपक्षयात्॥
नन्वेवमंधस्यत्वगिंद्रियोपनीतेनीलेप्रतियोगिग्राहकेंद्रियग्राह्यत्वेत्वभावस्यनायंधीर्बोधस्यचक्षुराद्यभावादितिचेत्न॥
अभावग्राहकत्वेनाभिमतमिंद्रियंस्वाश्रयग्रहोपक्षीणंतथाचप्रतियोगिग्राहकेंद्रियेणाश्रयग्रहेऽनुपलब्ध्याभावग्रहात्॥
अन्यथाचक्षुःसंयुक्तेपरमाणौजलत्वाभावग्रहप्रसंगः॥अथैवंवायौरूपाभावःपाषाणेसौरभाभावेगुडेतिक्ताभावश्चन
गृह्येतवाय्वादीनांप्रतियोगिग्राहकैश्चक्षुरादिभिरग्रहात्।नचतवापितेअभावाःकथंप्रत्यक्षाःवाय्वादिनातदिंद्रिया
योग्यत्वादितिवाच्यं॥लिंगेनत्वगादिनाचोपनीतेवाय्वादौयोग्यरूपाद्यभावविशेष्यकंप्रत्यक्षंचक्षुरादिनैवनवाय्वादिवि
शेष्यकंप्रत्यक्षंयोग्यविशेष्यस्यहेतुत्वादितिचेत्न।वाय्वादौरूपाद्यभावप्रतीतीनामनुपलब्धिलिंगकत्वात्तवानी
रूपोवायुरितिवायुविशेष्यकाभावप्रतीतिवत्।प्रथमत्वेअभावधीरिंद्रियजन्यासाक्षात्कारित्वात्।ततएवविशेष
सा॥ णतावत्कल्पनमपि॥नचैवंसाक्षात्कारित्वमसिद्धंपरोक्षत्वेज्ञातात्ज्ञातकरणकत्वानुपपत्तेः॥तथाहि॥मंदिरादरेचैत्रोनिपुणतरम
नुसृतेनचोपलब्धइत्याप्तवाक्यावगतानुपलब्ध्याश्रोतानुमिनोति।नासीत्तत्रचैत्रइति॥एवमभावधीस्तत्रपरोक्षा
चेन्नाज्ञातकरणिकापरोक्षत्वजातेर्ज्ञातकरणप्रयोज्यत्वात्॥ज्ञातकरणत्वंचज्ञानकत्वमज्ञातकरणत्वात्॥नन्विंद्रियजन्य
त्वमुपाधिः।ततएवतत्साधनादितिचेत्॥मैवं॥परोक्षत्वंहिनजातिः॥अनुभवत्वेनसंकरप्रसंगात्॥किंतुसाक्षात्कारित्वलिं
रणत्वंलिंगादेरजनकत्वात्तस्मात्साक्षात्का

॥विं॰मु॰प्र॰
॥४२॥

लिंगादेरजनकत्वात्॥तस्मात्साक्षात्कारभिन्नज्ञानत्वे।एवंचाभावज्ञानंपरोक्षमेवस्मृतिवत्॥यथाचाज्ञानकरणकत्वेपिशाब्दादि
नीनुमितिरेवमज्ञानकरणकत्वेपींद्रियजन्यसाक्षात्कारिअनुपलब्धिजन्यतादृशजातीयमानुपलब्धिज्ञानेयदिचाज्ञातकर
णकत्वेनसाक्षात्कारित्वतदाज्ञातकरणकत्वेनशाब्दादेरनुमितित्वापत्तिः॥ज्ञानकरणलिंगादिभेदादनुमित्यादिफलभेदइति
चेत्॥अज्ञातानुपलब्धींद्रियकरणभेदात्फलभेदइहापि।एवंचसाक्षात्कारित्वेइंद्रियजन्यत्वंपरोक्षत्वेइंद्रियाजन्यत्वं
चप्रयोजकंनतुज्ञाताज्ञातकरणजन्यत्वंगौरवात्स्मृतावप्यापत्तेश्च॥नन्वनुपलब्धिर्नमानंभावमतमानसहकृतस्यैवम
नसोबाह्यानुभवजनकत्वनियमादितिचेत्तन्न।भावत्वस्यगुरुत्वेनाप्रयोजकत्वात्।अन्यथेंद्रियसहकृतस्यैवाघ्राणम
रजनकत्वमित्यनुमानादिनमानंस्यात्।नचेदमभावज्ञानंभावमानसहकृतमनस्साध्यंबाह्याभावज्ञानत्वात्लिंगादि
जन्याभावज्ञानवदितिवाच्यम्॥अयमभावोनेंद्रियग्राह्योअभावत्वात्॥अयोग्याभाववल्लिंगाभावबुद्धिर्नेंद्रियज
न्याअभावबुद्धित्वात्लिंगादिजन्याभावबुद्धिवदितिसत्प्रतिपक्षत्वात्।अथप्रतियोगिग्राहकंमानंतदभावम
पिगृह्णातियथानुमानादिप्रतियोगिग्राहकंचेंद्रियमतोऽभावग्राहकमितिचेत्न।भावग्राहकयोरेवलिंगशाब्द
योरभावाग्राहकत्वात्॥प्रतियोगिग्राहकजातीयमानंतथेतिचेत्॥नउपमानव्यभिचारात्॥नेनचचक्षुरादिकमभाव
ग्राहकंवृत्तिभावग्राहकव्यक्तिजातित्वात्शाब्दत्ववत्॥उपमानत्वेनजातिरितिवाच्यं॥व्याप्तिविनाचक्षुरादेरभावग्राहक
त्वासाधनात्॥अथाभाव

मितितदेवाप्रमहेतुरतोऽभावप्रमायामपितदेवमानमितिचेन्नइंद्रियस्यापिदुष्टत्वदोष

॥हेरंब॥
॥४२॥

साहित्यमात्रेणत्वन्यत्॥तत्रानुपलब्धावपितुल्यं।नचज्ञानकरणाजन्यत्वमतेनेंद्रियजन्यत्वंएवंघटाभावप्रमाकरणत्वं
मपींद्रियस्यैवतएवास्तुकिमनयाकुसृष्ट्या।एवमस्त्वितिचेत्तन्न॥प्रत्यक्षभावेनाकोत्तरत्वात्।किंचसन्निकृष्टेपिज्ञानानुपनो
तेअभावेभ्रमइतींद्रियेणसम्भवतिचक्षुषापाषाणेसुरभीतिभ्रमवत्।अभावप्रमातुनसम्भवतिप्राप्यभावादित्युक्तं॥
नन्वधिकरणाभावयोर्विशिष्टबुद्धिरस्तिसानेंद्रियजन्याअभावबुद्धित्वात्।नानुपलब्धिजन्याभावबुद्धित्वात्।नो
भयजन्याजातिसंकरप्रसंगात्।अतउभयग्राहकमिंद्रियमभ्युपेयमितिचेत्।अभाववद्भूतलमित्यनुपलब्ध्युपनीता
भावविशिष्टबुद्धिरिंद्रियेणैवचक्षुषासुरभिचंदनमितिवत्।भूतलेघटोनास्तीतिचक्षुरूपनीतभूतलेअभावबुद्धि
रनुपलब्ध्यैवाघ्राणेनचंदनेसौरभमितिवत्॥यत्तुव्यापाराभावान्नानुपलब्धिःप्रमाणंव्यापारवतएवकरणत्वादितितन्न
इंद्रियार्थसंयोगव्यवच्छेदेनसंबंधिकरणेनतुव्यापारवदंशेपिविशेषणंगौरवादिति॥॥अत्रोच्यते॥प्रतियोगिग्राहक
एवेंद्रियेणाश्रयग्रहोनहेतुःप्राप्युत्पत्तितादृशस्थलेचान्वयेनव्यभिचारात्।वाय्वादौरूपाद्यभावप्रतीतिरिंद्रियजन्यैवनानुप
लब्धिलिंगजन्याअनुपलब्धेरज्ञानात्॥आप्तवाक्यस्यचतत्राप्यकस्याभावात्॥अथज्ञातेवरूपाद्युपलम्भस्यानुपलब्ध्या
रूपाद्यनुपलब्धिगृह्णाति॥भूतलेघटाभावमितिचेत्तन्न।तत्रायमुपलम्भस्यातींद्रियत्वेनयोग्यानुपलब्ध्याउपलम्भाभाव
स्यग्रहीतुमशक्यत्वात्।अनुलब्धिमात्रस्याभावाग्राहकत्वात्।अस्तुतर्हिज्ञानंयोग्यमितिचेत्तन्न।अपसिद्धान्तात्॥
योग्यत्वेपिभूतलीयघटाभावेपिज्ञातेवयोग्यानुपलब्धिलिंगमस्तुयोग्यघटानुपलम्भस्यानुपलब्ध्याग्रहसंभवात्॥

॥चिं०म०प्र०
॥४३॥

कृतमनुपलब्ध्यमानांतरेण। घटाभावधीरज्ञातकरणिकालिंगाद्यनुसंधानं विना जायमानत्वादिति चेत्। वाय्वादौ रूपाद्य
भावप्रतीतिरपि तथा॥ अथ रूपादिमत्तयाऽज्ञातत्वाभावस्तदनुमितरूपवत्तानुपलब्धिर्वा लिंगमिति चेत् न। वाय्वादौ रू
मत्तयाऽज्ञातत्वाभावस्य रूपाद्यभाववदनुमतया गृहीतुमशक्यत्वात् वाय्वादौ तस्य प्रत्यक्षत्वे रूपाद्यभावोऽपि तथास्तु। नो
पिकायवाग्व्यापाराभावेनानुपलब्धिरनुमीयते उपेक्षाज्ञानमकस्य प्रत्यक्षनियमाभिचारात्। नन्वेवं व्यवहाराभावमात्रं लिंगं
कस्यचिद्व्यवहाराभावस्य व्यभिचारात् सर्वव्यवहाराभावस्य गृहीतुमशक्यत्वात्। किंच घटवत्तयाऽज्ञातत्वाभावेन तद
नुमितानुपलब्ध्या वा लिंगेन तत्त्वादावप्यभावानुमितिः स्यात् किं मानांतरेणानुपलब्ध्या॥ अपि च॥ प्रतियोगिग्राहकें
द्रियजन्यमभावकरणं ज्ञानमनुपलब्धेः सहकारितदास्यात् यदि तेन विना स्तानाभावबोधः प्रमान्नचैतदृष्टं वाय्वादौ रूपाद्यभाव
तथा दृष्टमिति चेत् न। असिद्धेः। न च व्याप्तिबलात् सहकारित्वं एवं हि वाय्वादौ रूपाद्यभावप्रत्ययोऽनुपलब्धेरेवं स्यात्तत्राश्रय
ग्रहमास्त्रिणयेत्। अनाक्षेपदानानुपलब्धेर्भवेत्। तेनानुभवति किंतु लिंगादिति चेत्। लिंगमपि सैवत दूषितमेवा किंच
नानुपलब्धिर्लिंगं ततो नीरूपा वायुरस्य न इति स्यान्नवायोरूपाभावेऽपि॥ अपि च घटवत्सुपलभ्य प्राक्काले नुपलब्ध्या घ
टस्मितमतः कुतो नाभावधीः। घटाभाववत्तोत्तावादिति चेत्। तद्भावरूपार्थजन्याऽभावबुद्धिरर्थजन्यत्वेनसंशयकारणी
इंद्रियजन्या स्यात्। तदा घट एव प्रतिबंधक इति चेत्। तथापि तदभावात्तद्बुद्धेर्जनकः एवं स्यात्। स्यादेतत्। गृहमुपल
भ्य निर्गतश्चैत्रो यत्र केनचित् पृष्टः तत्र मैत्र आसीदिति स च क्षणं ध्यात्वा अनुपलब्ध्या न तत्र मैत्राभावमवगम्याह नासी
त्तत्र मैत्र इति। सेयं प्राक्कालिकताधीने तावत् स्मृतिः पुरा गेहेऽननुभूयमानमैत्रास्मरणात्तदभावानुभवात्। एवं च तत्रेंद्रि

॥हेरंब॥
॥४३॥

यव्यापारं विनैवानुपलब्ध्या अभावानुभवादन्यत्रापि सैव हेतुः क्लृप्तत्वात्। नदाहुः। स्वरूपमात्रं दृष्टं हि पश्चाद्यद्यर्थं स्मरन्नथ। तत्रान्य
नास्तितां पृष्टस्तदैव प्रतिपद्यत इति॥ मैवं। प्राक्कालिकतायां न तावदज्ञातानुपलब्धिर्भूतले घटाभावस्येवाभावग्राहिका तदानीं
गेहस्य विप्रकृष्टत्वेन योग्यानुपलब्धेरभावात्॥ नापि ज्ञाता॥ अनवस्थाप्रसंगात्॥ अनुपलब्धेरप्यभावरूपतयानुपलब्ध्य
न्तरग्राह्यत्वात्॥ उपलंभस्यानुपलब्धिरज्ञातैव स्वरूपसती मैत्रानुपलब्धिं गृह्णातीति चेत्। न। तन्नये उपलंभस्यातींद्रिय
त्वेन तदभावस्यायोग्यानुपलब्ध्यग्राह्यत्वात्॥ अथ गेहस्य योग्यमैत्रवत्तया स्मरणे गेहस्य स्मरणाभावस्तदाऽज्ञात एव गेहे मैत्रा
भावग्राहक इति चेत्। न। स्वरूपसतः स्मरणाभावस्य ग्राहकत्वे तस्मिन् सत्यभावसंशयविपर्ययाभावप्रसंगात्। भवति च कदा
चित्तत्रासीदिति विपर्ययस्तत्रासीन्न वेति संशयः। प्रत्याय दोषात्संशयविपर्ययौ न भवतः न चासाधारणप्रमाकारणं दूषयं
तु एव दोषाः संशयादिहेतवो भवंति न चात्र स्वरससिद्धस्य योग्यस्मरणस्य किंचिद्दूषितमिति वाच्यं। दोषसाहित्यमेव हि का
रणानां दुष्टता न हि दृष्टत्वं त्वादिना चक्षुषः किंचिदपक्रियते। किंतु प्रमायां दोषाद्यैवस्वरूपसतामेव प्रतिबंधकत्वमिति च
त्। अज्ञातायोग्यास्मरणात्तत्राभावधीरसिद्धेः॥ किंतु मनसा ज्ञातायोग्यास्मरणाल्लिंगात्। प्रमाणत्वेन क्लृप्तात्तत्राभाव
प्रतीत्युपपत्तौ नानुपलब्धिः प्रमाणांतरं कल्प्यते॥ योग्यस्मरणाभावो न मानोग्राह्यः प्रत्यासत्त्यभावात् ज्ञानस्यायोग्यत्वादिति
चेत् न। वाय्वादौ रूपाद्यभावप्रतीतेरलैंगिकत्वेनेंद्रियानुविधानात् तज्जनकत्वसिद्धेरिंद्रियसंबंधविशेषणतायाः प्रत्यासत्ति
त्वकल्पनात् ज्ञानप्रत्यक्षजानामीत्यनुव्यवसायपदलिंगाद्यजन्यत्वात्॥ न चाज्ञातं तल्लिंगं॥ निराकृतत्वात्। तत्रापि कथमभाव
संशयविपर्ययाविति चेत् न। लिंगे संशयविपर्ययाभ्यां लैंगिकसंशयविपर्ययदर्शनात्। यदा सुनिपुणेन ज्ञानविषयता
स्य योग्यमैत्रस्याननुभवस्मृतिस्मरणाद् गेहस्यास्मरणमवधीयते तदानुमितिः प्रमा। अत एव स्मरणे मात्रस्य व्यभिचारमुपलभ्य

॥चिं०म०॥ तदपेक्ष्यविशिष्टस्मरणज्ञातत्वमस्यप्रणिधानमुपयुज्यते अथोन्येध्यानमनुपपन्नं॥ स्वरूपसत एवास्मरणस्याभावस्यग्राहकत्वात्
॥४४॥ तस्माद्योग्यास्मरणं लिंगतयैवोपयुज्यते। प्रयोगस्तु — इह तदा मैत्राभाववत्॥ तत्तुल्यपरिमाणादियोग्यतयास्मरणेपि तद्वत्तयोअस्म-
र्यमाणत्वाद्यदेवं यथा घटाभाववद्भूतलमिति॥ नन्वभावो भावात्मैव तत्तत्र संयोगादिरेव प्रत्यासत्तिरिति निर्विशेषणता प्रसंगेति न
तत्रप्राह॥ अस्ति तावदिह भूतले घटो नास्तीत्यबाधिता बुद्धिः सा चेयं न तत्(?)लालंबना घटवत्यपि प्रसंगात्॥ नापि केवलभूतलाल-
बना॥ अतिरिक्तकैवल्यानभ्युपगमात्॥ भूतलमेव कैवल्यमिति चेन्न तर्हि पौनरुक्त्यमधिकं॥ अपि च आधाराधेयभावानुपपत्तिश्च॥
अथाधिकाभाववादिनाप्यभावस्याश्रयो वाच्यः देशादिनियमेन व्यवहारात्॥ यथा किं भूतलविशेषो याभावाश्रयः स चेन्न भूतलमात्रं
घटवत्यपि प्रसंगात्॥ नाभावयुक्तमन्योन्याश्रयात्॥ न घटवद्विरोधीति चेन्न। विशेषस्याभावाश्रयत्वात्॥ स च ननुगत एव॥
एकाश्रयताप्यननुगतस्यापि घटाश्रयतेव भवति किं तु कुत्राभाव इति प्रश्ने यत्र प्रतीयते तत्रैवोत्तरं प्रतीयत इत्यत्र यत्रास्तीत्येव
अन्यथा गोत्वादिकमेवंपि तत्र नास्ति कियत्तदाश्रयविशेषाद्व्यवहारसंभवात्॥ तथापि कीदृशि भूतले अभाव इति चेत्॥ अभावप्र-
वेसमये केवलभूतलमिति ब्रूमः घटवदित्युत्तरं अभावसमये अभाववदिति। मध्यसमयस्तु नास्त्येव। इह भूतले घटाभाव इत्याधारा-
अ धेयभावप्रतीतेश्चाभावाधीरत्वेनैतस्य न प्रतीयते॥ किं तु न तन्मात्रबुद्धिविषयत्वमिति चेत्॥ अहो व्याख्याकौशलं शास्त्रानुभवोपि व्याख्या-
यं कथ्यते। तन्मात्रपदार्थानिर्वचनं च। नहि भूतलबुद्धिस्तन्मात्रबुद्धिः घटवद्भूतलबुद्धेरपि तन्मात्रबुद्धित्वात् सा बुद्धिर्न भूतलत्व-
स्य किं तु घटभूतलयोरग्नीषोमयोरिव देवतात्वमिति चेन्न॥ ततो भूतलव्यवहारप्रसंगात्॥ भूतलविषयत्वात्॥ अशुभ-
वि भूतलविषयकज्ञानान्तरादिति चेत्। न हि सेव बुद्धिस्तत्र बुद्धिरिति तन्न देशे घटाभावव्यवहारप्रसंगः॥ एतेन भूतलेन्द्रियसन्निकर्ष
घटवद्भूतलेन्द्रियसन्निकर्षजज्ञानयोर्विशेषो गीर्वर्णनीयः॥ सामग्रीभेदस्य कार्यभेदनियतत्वात् तथा च स एव तन्मात्रपदार्थ इति ...दोषं॥
निरस्तं ततोपि भूतलव्यवहारात्॥ प्रतियोगितद्व्याप्येतरज्ञानेतरभूतलबुद्धिरभाव इति चेन्न। घटवति तज्जनिताया अपि तदितर ॥४४॥

भूले

जनितत्वात्॥ तन्मात्रजनितासेति चेन्न। घटवति तज्जनितायोपि भूमात्रार्थस्याभावत्वात्॥ तस्य चापरिज्ञानात्॥ घटविषयस-
तोभूतलविषयेति चेन्न। - - - - तरत्वात्॥ किं च प्रतियोगिनिरूपणाधीननिरूपणो भावो बुद्धिस्तु न तथा प्रतियोगित्रकरं विना-
पि बुद्धिनिरूपणात् व्यवहारार्थं तु प्रतियोगिज्ञानापेक्षा प्रतियोगिज्ञानं विना अभावो ज्ञातं एवेति चेन्न॥ व्यवहारस्य व्यवहर्त-
व्योपलंभमात्रनिबंधनत्वेन तथा अदृष्टचरत्वात्॥ यदि च प्रतियोगिस्मरणसापेक्षात् तन्मात्रधीरभावपदार्थस्तदाघकूपादौ
यातन्मात्रधीः स अभावो न स्यात्॥ तथा च तत्रैव चरन् कंटके विध्यत कूटकस्मरणं विना कंटकाभावान् निर्जने च धीविह-
देपि जलनिःसंसरणं न स्यात्तदानीं तन्मात्रबुद्धेः सर्वथा अभावात्॥ किं च तन्मात्रधीनाशे घटोन्मज्जनप्रसंगः घटाभावाभावस्य
घटत्वात्॥ यच्चादि अभावो नातिरिक्तस्तदा यत्र घटसंसृष्टबुद्धिरासीत् तत्र तन्मात्रधीः मुद्गरपातजन्यातिरिक्तविषयानंगी-
कारात्॥ अतिरिक्ताभावे किं मानमिति चेत्॥ नास्तीतिबुद्धिरेव। न त्वभावव्यवहारानुपपत्तिः अन्योन्याश्रयादिति॥ अत्र प्राभाकराः॥
घटवद्भूतलबुद्धिभिन्नभूतलबुद्धिरभावव्यवहारकारणं॥ नैव दोषात् घटवति घटाज्ञाने भूतलज्ञानमभावस्यादिति वाच्यं॥ घटवति
भूतलस्य ज्ञानोद्भिन्नस्य भूतले ज्ञानस्याभावत्वात् तद्भवा च भावभ्रमः॥ वस्तुतोसंताभावे प्रतियोगिमदधिकरणस्याप्रसिद्धेः॥ ज्ञान
प्रतियोगिमज्ज्ञानभिन्नमधिकरणज्ञानं व्यधिकरणाभावव्यवहारकारणं॥ समानाधिकरणनिषेधप्रतीतिश्च प्रतियोग्यधिक-
रणयोः स्वरूपके यमालंबते तेन घटवत्त्वेन ज्ञायमाने भूतले भूतलं घटो नेति प्रतीतिः तथाच यस्याभाववत्ता न कारणत्वप्रत्येषा तद-
वाभावव्यवहृतिकारणमस्तु। न ह्यधिकरणबुद्धिं विना तद्बुद्धिः। न च भूतलबुद्धित्वेन घटवत्यपि प्रसंगात्। न चाभावाधिकरण-
भूतविषयत्वादिविशेषः प्रतियोगिसत्वेपि नासीदिदमितिप्रतीतेः। किंच ज्ञानविषयस्य भूतलस्याभावो यदि विशेषणं तद-
अभावज्ञानमेवेति ज्ञानं कारणं उपलक्षणं चेन्न। न कश्चिद्विशेषः प्रतियोगिमत्तयानुपलब्धेरपि कारणमिति चेन्न॥ प्रतियो-
गिमत्तयोपलंभेपि प्रागासीदिदमत्रेति प्रतीतेः॥ बुध्यापि विशेषः स्वरूपविशेषो वेदनान्योन्याभावो न वस्तानादात्माश्रयाद्दा

स्यदः

DA BHAU DAJI

खं०मू०
॥४८॥

भूतलज्ञानापेक्षया घटवद्भूतलज्ञानत्वमेववावैधर्म्यभेदः नन्वतिरिक्ताभावपक्षेप्यन्योन्याभावे संताभावेन्चनियमानमस्ति प्रतियोगिनि
बुद्धिस्थे अधिकरणस्वरूपस्यैवानतिप्रसंजकत्वात् । नहि तत्राधिकरणस्य प्रतियोगिमत्वं प्रतियोगिनादात्म्यं वा संभवति । अतएवा
भावे अभावांतरं न स्वीकुरुषे अधिकरणद्वैरूप्याभावात् ॥ नन्वर्थेनैव विशेषो बुद्धेर्न वात्रार्थभेदोस्ति । मैवं । नहि तावदर्थो ज्ञान
कारणमवश्यं किंतु सामग्रीविशेषाद्बुद्धिविशेषो जायते धारावाहिकवत् । यद्वा घटवद्भूतलेपि न भूतलमभावो यत्र परेषाम
भावः भेदश्च स्वरूपमेवातादात्म्येन प्रतीतौ प्रतीतिरिति तत्रापि स्वरूपभेदलक्षणं ॥ इदानीमिदं भूतलं घटवद्भूतलं न भवती
ति प्रतीतेः । एतावानस्तु विशेषो यत्तवसमानाधिकरणनिषेधप्रतीतिरियमन्योन्याभावभेदमालंबते ममतुस्वरूपभेदं ।
ननु यदेव भूतलं घटवद्भूतलाभिन्नमासीत् तदेव कथं तद्भिन्नमिति चेत् न तत्राप्यबाधितसमानाधिकरणनिषेधप्रतीतिबलेना
न्योन्याभावसिद्धेस्तथात्वस्यदुर्वारत्वात् । समयभेदेन न भेदाभेदौ विरुध्येते इति तु समं यदि घटवद्भूतलभिन्नं तद्भूतलं तदानीं न
स्यात् तदा घटवद्भूतलव्यवहारस्तत्रापि स्यात् । घटतदभावावच्छेदभेदेनान्योन्याभावतदभावौ भूतले वर्तेते इति चेन्ममापि
भूतलबुद्धिघटवद्भूतलबुद्ध्यवच्छेदभेदेन स्वरूपभेदाभेदौ वर्तेते इति गृहाण । ननु भूतले घटोस्ति न वेति संशये घटोस्तीति विप
र्ययो वा कथं भवेत् । प्रतियोगिनि बुद्धिस्थे अधिकरणस्य तज्ज्ञानस्य वा अभावस्योपलंभादिति चेन्न भूतले तज्ज्ञाने वा घटवद्भिन्न
भूतलत्वस्य घटवद्भूतलज्ञानभिन्नत्वस्य वा दोषवशेनानिश्चयात् । भूतलतज्ज्ञानस्वरूपाणामननुगतत्वात्कथमनुगतव्यवहार
इति चेन्न । अभावेपि तुल्यत्वात् । न घटाभावत्वसामान्यं अभावत्वसामान्यगतान्योन्याभावाव्यापकत्वात् । न च भावविरोधित्वं वि
रोधस्याभावनिरूप्यत्वात् भावाभावयोस्सहावस्थानाभावस्य स्वरूपानतिरेकाच्च । नापि भावप्रतियोगित्वं प्रतियोगित्वस्याभा
वविरहरूपत्वात् । अभावाभावस्याभावाप्रतियोगित्वाच्च । नापि सप्रतियोगिकत्वं समवायसादृश्यादीनामपि तथात्वात् । नापि प
रकीयस्वभावत्वज्ञानादिगतत्वात् । स्वभावशब्दस्य स्वरूपार्थत्वेनाननुगतत्वाच्च । नापि सत्ताशून्यत्वं सत्तायामेवगतत्वाच्च ॥

हेरंब॥
॥४५

शून्यत्वस्याभावनिरूप्यत्वाच्च । सत्तात्यंताभाववत्वमभावत्वं । अत्यंताभावश्चाभावत्वानवगतत्वेप्यवगत इति चेन्न अभावे अभा
वानभ्युपगमात् तथात्वे वा तत्रैव तदनभ्युपगमात् । सत्ताबोधविधुरत्वमभावत्वसामान्यादौ सत्तावगमेपि बाधासामञ्जस्यतः । अभा
वस्य तु तद्विरोधितयैव प्रतीतेरिति चेन्न विरोधित्वस्य स्वरूपानतिरेकात् । सहानवस्थाननियमो विरोध इति न । अनवस्थान
स्याभावत्वेनात्माश्रयात् । भावभिन्नमिति चेन्न भेदस्य स्वरूपान्योन्याभावरूपत्वेउक्तदोषत्वात् । वैधर्म्यस्य [illegible]त्वात्
प्रागभावत्वादेरभावनिरूप्यत्वात् । एवं च दशवीयेनानुगमस्तदा किमधिकेन । स्वरूपविशेषादेव घटस्यापि व्यवहारोस्त्विति
चेत् न । भूतलविलक्षणघटानुभवात् । एकएवाभावोनुगतमिति चेत् न तस्यानित्यत्वेन प्रतियोगिकालेप्यभावव्यवहारप्रस
गात् । प्रागभावादिस्तूत्पादनेविरोधाच्च ॥ यद्वा अभाववादिनाप्यभावज्ञानकारणमनुगतो भूतलबुद्धिविशेषः स्वीकार्यः
तद्वरं स एवास्तु प्रमाणं प्रमेयं च स्वप्रकाशत्वाद्बुद्धीनां । ननु तन्मात्रबुद्धेरभावत्वे तस्याः स्वप्रकाशत्वेन प्रतियोगिज्ञानापेक्षा
न न स्यादिति चेत् न गृहाण यतदपेक्षापि नु व्यवहाराय ज्ञानस्य सर्वाभिलापायामपि ज्ञानपेक्षा व्यवहारार्थमिति चेन्न । दृष्टो
हि व्यवहारार्थमन्यापेक्षा यथा परिमाणादौ व्यवहारे । तथाहि । अधिकसंख्यापवछिन्नहस्तवितस्त्यवच्छेदः परिमाणस्पर्दीर्घ
त्वतद्विपरीतह्रस्वत्वादावपि परिमाणेवाऽवयविरमकलंबानुभूत ॥ दीर्घ्यपदे शास्त्वल्पसंख्यावछिन्नहस्तवितस्त्यः घ
वच्छेद्यपरिमाणज्ञानमपेक्ष्यत इति तन्मात्रबुद्धेरभावत्वेप्यप्रतियोगिज्ञानापेक्षा तथात्व्यता सप्तम्यर्थकेरफ्कोटादिसूक्ष्म
जिज्ञासाप्यर्थवती । न च तन्मात्रबुद्धेरभावत्वे तद्विनाशे अभावाभावे भावेत्यन्नप्रसंग इति वाच्यं यथा घटाभावो बुद्धि
स्तथा बुध्यभावस्यापि बुद्ध्यंतरत्वान्निजेनैवधनविच्छेदे जलनिस्सरणानुपपन्नमनुष्यस्याभावेपि कीटादिरूपो हि विद्व
षसंभवात् । मोक्षो पुरुषांतरस्यानियमेन प्रमाणान्नास्तीति चेत् न । कार्यकारणकल्पनात् । न चैव बुद्धिनाशेपुनः संसारिता ।

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

॥किं मू०॥ बुद्धिप्रकारासंभवात्॥ नन्वसर्वमुक्तिः प्रमाणाभावात्॥ प्रतियोगिमदधिकरणभिन्नाधिकरणस्वरूपत्वाभावत्वे सर्वं समंजसमिति पू-
॥४६॥ र्वः पक्षः॥ ॥सिद्धांतस्तु। सप्रतियोगिकोभावेनुभूयते। घटेन पटो नेत्यनुभवात्। ननु तन्मात्रं अतोभाववर्त्तित्वेस्तु त्वं प्रतियोगि-
नः प्रतियोगिज्ञानाधीनज्ञानत्वं वा भावस्यानुभवसाक्षिकं गोसादृश्यवत् न चैवं केवलमधिकरणं तज्ज्ञानं वा अभावः प्रतियोगि-
ज्ञानं विनापि तद्बुद्धेः॥ तद्बुद्धौ प्रतियोगिनो विषयत्वाच्च। तस्य सप्र[illegible]योगिकत्वाभावे कस्य प्रतियोगी घटः अथ केवलम-
धिकरणं तज्ज्ञानं वा अभावः सप्रतियोगिक एव अभावव्यवहारस्तु प्रतियोगिज्ञानमपेक्षत इति तस्य प्रतियोगी घटः
घटतदभावव्यवहारयोर्विरोधादिति चेत् न। घटो नेति॥

॥हेरंब॥
॥४६॥